

# खण्डः - II



## आजीविका अर्थव्यवस्था समाजः च





# भूमण्डलीकृतस्य विश्वस्य निर्माणम्

## आधुनिक-युगात् पूर्वम्

यदा वयं वैश्वीकरणस्य विषये चर्चयामः तदा सामान्यरूपेण वयम् एतादृश्याः आर्थिकव्यवस्थायाः विषये चर्चां कुर्मः, या स्थूलरूपेण गतेषु पञ्चाशत् वर्षेषु एव अस्माकं पुरतः समुपस्थिता। परन्तु यथा भवन्तः अस्मिन् अध्याये द्रक्ष्यन्ति यत् भूमण्डलीकृतस्य विश्वस्य निर्माण-प्रक्रियायाः इतिहासः सुदीर्घतरः अस्ति तद्यथा – वाणिज्याय कार्यान्वेषणाय च इतस्ततः भ्रमतां जनानां, पुञ्जीवादिनाम् अनेकेषां वस्तूनां वैश्विकावागमनस्य च इतिहासः अस्ति। यदा वयं स्वजीवने वर्तमानानां परस्परं वैश्विक-सम्पर्कानां विषये विचारयामः तदा वयं तस्य कालस्य विषये अपि अवगन्तुम् इच्छामः यतः अस्माकम् अतीतकालम् आसीत् तं च अतीत-कालं व्यतिक्रम्य एव वयम् आधुनिकविश्वं प्रविष्टवन्तः।

इतिहासस्य प्रत्येकस्मिन् काले मानवसमाजः परस्परं घनिष्ठसम्बन्धं स्थापितवान्। प्राचीनकालात् एव यात्रिणः वणिजः धर्माचार्याः तीर्थयात्रिणः च ज्ञानाय आध्यात्मिक-शान्तये दुःखपूर्ण-जीवनात् मुक्तये च दूरस्थ-देशानां यात्रां कुर्वन्ति स्म। यात्राकारणात् एतादृशाः यात्रिणः विविधप्रकारकाणि वस्तूनि धनं संस्कृतिं धार्मिकमान्यताः विचारान् आविष्कारान् रोगविषाणून् चापि अन्योऽन्यदेशं प्रति नयन्ति स्म। 3,000 ख्रिस्ताब्दात् पूर्वं समुद्रतटेषु जायमानस्य वाणिज्यस्य माध्यमेन सिन्धुघाटीसभ्यता तेन क्षेत्रेणापि सम्बद्धा आसीत् यत् क्षेत्रं वयम् अद्य पश्चिमैशिया इति नाम्ना अपि जानीमः। सहस्रं वर्षेभ्यः अपि पूर्वं मालदीवस्य समुद्रे याः वराटिकाः भवन्ति स्म तासां प्रयोगः धनमुद्रारूपेण क्रियते स्म। तासां वराटिकानां व्यवहारः चीनदेशे अफ्रीकायां चापि भवति स्म। रोगविषाणवः दूरं यावत् संक्रमन्ते स्म, सः इतिहासः अपि सप्तमशताब्दं यावत् आसीत्। त्रयोदशशताब्दात् परं तु एतादृशस्य इतिहासस्य प्रचारः निश्चयेन जातः इति वयं स्पष्टतः द्रष्टुं शक्नुमः।



***चित्रम्- 1 – कस्याञ्चित् स्मृतिशालायां जलपोतस्य चित्रम्, गोवा-सङ्ग्रहालयः, दशमशताब्दः।***

*पश्चिमतटसम्बद्धे क्षेत्रे प्राप्यमाणानां नवमशताब्दस्य अनन्तरकालिकीषु स्मृतिशिलासु जलपोतानां चित्रैः तात्कालिकस्य सामुद्रवाणिज्यस्य महत्त्वस्य सूचना प्राप्यते।*

## 1.1 कौशेयमार्ग-सम्बद्धं (शिल्करूट) विश्वम्

आधुनिककालात् प्राक्तने काले विश्वस्य सुदूरस्थितभागानां मध्ये वाणिज्यिकानां सांस्कृतिसम्पर्काणां च सर्वाधिकम् उचितम् उदाहरणं (सिल्क) कौशेयमार्गाणां रूपेण दृश्यते। सिल्कमार्ग इति नाम्ना एव ज्ञायते यत् अनेन मार्गेण पश्चिमं प्रति प्रेष्यमाणस्य चीनकौशेयस्य कियत् महत्त्वम् आसीत्। इतिहासकाराः नैकेषां कौशेयमार्गाणां विषये सूचितवन्तः। भूमार्गाः सामुद्रमार्गाः च न केवलम् एशियायाः विशालक्षेत्राणि एव परस्परं योजयन्ति स्म अपि तु एशियां यूरोपेण उत्तर-अफ्रीकया सह अपि योजयन्ति स्म। एतादृशाः मार्गाः ख्रिस्ताब्दात् पूर्वम् एव विकसिताः आसन् तथा च उप-पञ्चदशशताब्दम् अस्तित्वं गताः आसन्। अनेन मार्गेण एव चीन-मृत्तिका-निर्मित-पात्राणाम् इत्यस्य व्यापारः भवति स्म तथा च अनेन एव मार्गेण भारत-दक्षिण-पूर्व-एशियायाः वस्त्राणि उपस्कराणि च विश्वस्य अपरान् भागान् प्रति प्राप्नुवन्ति स्म। प्रत्यागमनकाले च वणिजः सुवर्ण-रजतसदृशान् बहुमूल्यधातून् यूरोपतः एशियां प्रति आनयन्ति स्म।



*चित्रम् – 2 – चीनस्य काचित् गुहा। चित्रकलामाध्यमेन दर्शितः कौशेयमार्गः। अष्टमः शताब्दः, गुहा 217, मोगाओ ग्राटोजम्, गन्सू, चीनः।*

वाणिज्यं सांस्कृतिकम् आदानं प्रदानं च इति प्रक्रिये सहैव चलतः स्म। आरम्भिककालिकाः ख्रिस्तधर्मावलम्बिनः निश्चयेन एव अनेन मार्गेण एशियां प्रति आयान्ति स्म। परवर्तिकाले मुस्लिमधर्मोपदेशकः अपि अनेन मार्गेण विश्वे प्रसारं प्राप्तवन्तः। मुस्लिम-विचारधारायाः पूर्वं भारते प्रादुर्भूतः बौद्धधर्मः विविधैः कौशेयमार्गैः बहुषु दिक्षु प्रसारं प्राप्तवान् आसीत्।

## 1.2 भोजनविषयकः इतिहासः – स्पैघेती आलुकं च

अस्माकं खाद्यपदार्थाः सुदूरदेशाभ्यन्तरे सांस्कृतिकस्य आदानस्य प्रदानस्य च उदाहरणं प्रस्तुवन्ति। यदा वणिजः यात्रिणः च कञ्चित् नूतनदेशं प्रविशन्ति स्म, जानन्तः अथवा न जानन्तः एव तत्र नूतनानि बीजानि उप्त्वा स्वदेशं प्रति आयान्ति स्म। सम्भाव्यते यत् विश्वस्य विभिन्नभागेषु अल्पकालावधौ सिद्धानां खाद्यानां सामूहिकानि स्रोतांसि अपि स्युः। आयान्तु, स्पैघेती, शिराखाद्यः (नूडल्स) इति द्वौ खाद्यपदार्थौ जानीमः। मन्यते यत् नूडल्स इति चीनात् पश्चिमदेशान् प्राप्नोत् अपि च तस्मात् च एव स्पैघती (Spaghetti) इत्यस्य खाद्यस्य जन्म अभवत् अथवा शक्यते यत् पास्ता इति खाद्यम् अरब-यात्रि-माध्यमेन पञ्चमशताब्दे सिसली इति स्थानं प्राप्नोत् सिसली इति अधुना इटलीदेशस्य एव किञ्चित् द्वीपम् अस्ति। एतादृशम् एव खाद्यं भारते जापाने च अपि प्राप्यन्ते अतः शक्यते यत् वयं कदाचित् एतत् न अवगन्तुं शक्नुयाम यत् तादृशस्य खाद्यस्य उत्पत्तिः कथं स्यात्। पुनरपि, एतासाम् अनुमानानाम् आधारेण एतावत् तु अवश्यमेव वक्तुं शक्यते, यत् आधुनिककालात् पूर्वम् अपि सुदूरदेशमध्ये सांस्कृतिकम् आदानं प्रदानं च जातं स्यात् एव।



*चित्रम् – 3 – वेनिसतः पूर्वदेशेभ्यः च समागताः वणिजः वस्तूविनिमयं कुर्वन्तः सन्ति, मार्को-पोलो, बुक-ऑफ-मार्वल्स, पञ्चदश-शताब्दः।*

आलूकं सोया-द्विदलं कलायः कणिशं रक्ताङ्गं मरिचः शर्कराकन्दं च इत्यादयः खाद्यपदार्थाः प्रायः पञ्चशतेभ्यः वर्षेभ्यः पूर्वम् अस्माकं पूर्वजानां पार्श्वे विद्यमानाः न आसन्। एते खाद्यपदार्थाः यूरोपे एशियायां च तदा समायाताः यदा क्रिस्टोफर-कोलम्बस-महोदयः अनवधानेन तत् अज्ञातद्वीपं प्राप्नोत् यत् परवर्तिकाले अमेरिकानाम्ना अभिज्ञातम्।

(अत्र) अमेरिका इत्यनेन अभिप्रायः अस्ति उत्तरामेरिका,दक्षिणामेरिका, कैरीबियनद्वीपसमूहः च इति । वस्तुतः, अस्माकं नैके खाद्यपदार्थाः अमेरिकायाः मूलनिवासिभ्यः अर्थात् अमेरिकास्थ-भारतीयेभ्यः अस्माकं पार्श्वे आगताः ।

नैकधा नवसस्येषु आगतेषु सत्सु जीवने महद् वैभिन्न्यं समायाति स्म । आलुकस्य प्रयोग-सामान्यकारणात् यूरोपीय-निर्धनानां जीवनं सर्वथा परिवर्तितम्। तेषां भोजनं श्रेष्ठं जातं तथा च तेषां सामान्यतः वयःपरिमाणम् अपि वर्धितुम् आरभत। आयरलैण्डस्य निर्धन-कृषिजीविनः तु आलुक-सस्यस्य आश्रितम् एव जीवनं कृतवन्तः, एकदा 1840 तमदशकाभ्यन्तरे आलुक-सस्यं रोगेण ग्रस्तं तस्मात् सस्यं नष्टं, ततः लक्षाधिकाः जनाः दुर्भिक्षेण मृत्युं प्राप्तवन्तः ।

## 1.3 विजयः रोगः वाणिज्यं च

यदा षोडशशताब्दे यूरोपीय-नाविकाः एशियापर्यन्तं गन्तुं मार्गम् अन्विष्टवन्तः तथा च ते पारे-पश्चिमसागरम् अमेरिकां प्राप्तवन्तः तदा पूर्वाधुनिकविश्वं लघिष्ठम् इव जातम् । इतः पूर्वं नैकशताब्देभ्यः हिन्दमहासागरस्य जलमार्गेण विकसत् वाणिज्यं विविधानि वस्तूनि जनाः ज्ञानं परम्पराः संस्कृतिः च एकस्मात् स्थानात् अपरस्थानं प्रति गमनागमनं कुर्वन्ति स्म । भारतीयोपमहाद्वीपम् एतादृशानां वस्त्वादिकानां प्रवाहमार्गे महत्त्वपूर्णं स्थानं भजते स्म । सम्पूर्णव्यवस्थायाम् एतस्य क्षेत्रस्य अतीव महत्त्वम् आसीत् । यूरोपीय-जनानां प्रवेशात् इदं गमनागमनम् इतोऽपि वर्धमानम् आसीत् तथा च एतेषां प्रवाहाणां दिशा यूरोपं प्रति भ्रमितुम् आरब्धा ।

निजान्वेषणात् पूर्वं लक्षाधिकं वर्षेभ्यः प्राक् अमेरिकादेशस्य अवशिष्टविश्वेन सह कोऽपि सम्पर्कः न आसीत् । परन्तु षोडशशताब्दात् आरभ्य तस्य विशालभूमिः, असङ्ख्यकानि सस्यानि, खनिजपदार्थाः च इत्यादिषु प्रत्येकं क्षेत्रेषु स्वरूपं जीवनं च परिवर्तमानम् आसीत् ।

वर्तमाने पुरू-देशे मैक्सिको-देशे च स्थितेभ्यः आकरेभ्यः जायमानेभ्यः बहूमूल्यधातुभिः विशेषतया रजतेन अपि यूरोपीय-सम्पदा वर्धिता अपि च पश्चिम-एशियास्थदेशैः सह जायमानस्य तस्य वाणिज्यम् अपि गतिमत् कृतम् । सप्तदश-शताब्दस्य आगमनात् प्राक् यूरोपे दक्षिण-अमेरिकायाः धनस्य सम्पदायाः च विषये विविधाः कथाः श्रूयन्ते स्म । एतासां किंवदन्तीनां कारणात् तत्रत्याः जनाः एल-डोराडो इति नगरं सौवर्णनगरम् अस्ति इति मान्यता जाता तथा च तत् अन्वेष्टुं नैकानि अन्वेषक-अभियानानि आरब्धानि ।

षोडश-शताब्दस्य मध्यकालस्य आरम्भात् पूर्वं पुर्तगालि-स्पेनिश-सेनाभ्यन्तरे विजयाभियानम् आरब्धम् । सेनाः अमेरिकाम् उपनिवेशं कर्तुं आरब्धवत्यः । यूरोपीय-सेनाः केवलं निजसैन्यबलेन एव न विजयिन्यः भवन्ति स्म । स्पेनिशविजेतॄणां सर्वशक्तिशालिषु अस्त्रेषु परम्परागत-शस्त्रं तु एकम् अपि न आसीत् । एतानि शस्त्राणि तु वसन्तरोगसदृशानि कीटाणुरूपाणि आसन् यानि स्पेनिशसैन्यबलैः अधिकारिभिः च सह तत्र प्राप्तवन्ति आसन् । लक्षाधिकवर्षेभ्यः विश्वसमुदायात् अमेरिकीयाः जनाः पृथक् आसन् तस्मात् कारणात् अमेरिकावासिनां शरीरेषु यूरोपदेशेभ्यः संक्रमणशीलरोगेभ्यः त्रातुं रोगप्रतिरोधिक्षमता एव नैव आसीत् ।



*चित्रम् – 4 - आयरलैण्डे आलुकदुर्भिक्षम्, इलस्ट्रेटेड-लन्दन-वार्ता, 1849*

*सस्यस्य कर्तनात् परम् अवशिष्टानाम् आलुकानाम् आशया क्षेत्रस्य मृदां खनन्तः बालाः । 1845 तमख्रिस्ताब्दात् आरभ्य 1849 तमख्रिस्ताब्दस्य आभ्यन्तरे जाते भयङ्कर-आयरिश-आलुक-दुर्भिक्षकाले आयरलैण्डस्य प्रायः 10,00,000 इति सङ्ख्यकाः जनाः क्षुधया मृतवन्तः । ततः अपि द्विगुणिताः जनाः कार्यम् अन्वेष्टुं निजगृहाणि परित्यज्य अन्यक्षेत्राणि प्रति गतवन्तः ।*

### प्रथमा मञ्जूषा

**जैविक-युद्धम् ?**

नवेङ्ग्लैण्डस्थितस्य मैसाचुसेट्स-बे-कॉलोनी इत्यस्याः प्रथमराज्यपालः जॉन-विनथॉर्प-महोदयः 1934 तमख्रिस्ताब्दस्य मे-मासे अलिखत् यत् वसन्तरोगः उपनिवेशकारेभ्यः ईश्वरेण प्रदत्तं वरदानरूपम् अस्ति – स्वदेशिजनता , लघुवसन्तरोगात् समाप्तप्राया आसीत् । अनेन प्रकारेण परमेश्वरेण अस्माकं सम्पत्तौ अस्माकं स्वामित्वं प्रदत्तम् ।

*अल्फ्रेड-क्रॉस्बी, इकोलॉजिकल-इम्पीरियलिज्म ।*

फलतः, एतस्मिन् नूतने स्थाने वसन्तरोगः अतीव मारकत्वेन जातः। एकदा सङ्क्रमणस्य आरम्भात् परं तु अयं रोगः सम्पूर्णे महाद्वीपे एव प्रसृतः। यत्र यूरोपीयाः जनाः न प्राप्तुं शक्तवन्तः आसन् तत्रत्याः जनाः अपि अस्य रोगस्य सङ्क्रमणेन सङ्क्रान्ताः जाताः। अनेन नैके समुदायाः एव नाशिताः। अनेन प्रकारेण बलात्प्रवेशकानां कार्यं नैरन्तर्येण सरलं जातम्।

भुशुण्डीनां क्रयणं कृत्वा अपि च ताः प्रहृत्य आक्रमणकारिणां प्रशमनाय अपि तासां प्रयोगं कर्तुं शक्यते स्म। परन्तु वसन्तरोगसदृशानां रोगाणां विषये न तथा किमपि कर्तुं शक्यते स्म यतो हि आक्रमणकारिणां पार्श्वे रोगेभ्यः त्रातुम् उपायः अपि आसीत् तथा च तेषां शरीरेषु रोगप्रतिरोधक-क्षमतायाः अपि विकासः जातः आसीत्।

नवदश-शताब्दं यावत् यूरोपे विपन्नतायाः क्षुधायाः चैव साम्राज्यम् आसीत्। नगरेषु अतीव जनसम्मर्दः आसीत् अपि च व्याधीनाम् अपि आधिक्यम् आसीत्। धार्मिकविद्वेषात् सङ्घर्षाः अपि प्रायः जायन्ते स्म। धार्मिकाः असन्तुष्टाः कठोरदण्डेन दण्ड्यन्ते स्म। एतस्मात् कारणात् सहस्रशः जनाः यूरोपीयदेशेभ्यः पलायित्वा अमेरिकां प्रति गन्तुम् आरब्धवन्तः। अष्टादशशताब्दं यावत् अफ्रीकातः स्वायत्तीकृत्य आनीताः क्रीतदासाः अमेरिकादेशे कार्ये नियोज्यन्ते स्म तैः च यूरोपीयमहाहट्टानां कृते कार्पासस्य शर्करायाः च उत्पादनं कार्यते स्म।

अष्टादश-शताब्दस्य उत्तरार्द्धे चीनभारतदेशौ आविश्वम् आढ्यतरौ देशौ स्तः इति रूपेण तयोः गणना भवति स्म। एशियास्थे वाणिज्ये अपि तयोः एव प्रभावः आधिक्येन आसीत्। परन्तु विशेषज्ञानां मतम् आसीत् यत् पञ्चदश-शताब्दात् चीनदेशः अन्यैः देशैः सह निजसम्बन्धान् न्यूनीकर्तुम् आरब्धवान् अपि च सः विश्वसमुदायात् पृथक् भवन् आसीत्। चीनस्य विकलितभूमिकायाः अमेरिकायाः च वर्धमानस्य महत्त्वस्य कारणात् विश्ववाणिज्यस्य केन्द्रं पश्चिमं प्रति गन्तुम् आरभत्। अधुना यूरोपः एव विश्ववाणिज्यस्य महत्तम-केन्द्ररूपेण जातः।

## नूतनशब्दः –

असन्तुष्टः – यः स्थापित-परम्पराः उपायान् च न मन्यते।

## चर्चां कुर्वन्तु –

यदा वयं कथयामः यत् षोडशशताब्दे विश्वं सङ्कीर्णतां प्रति गच्छति स्म तदा अनेन वाक्येन कः अभिप्रायः अस्ति ?




*चित्रम् – 5 – क्रीतदासानां क्रयणं विक्रयणं च, न्यू-आर्लियंस, इलस्ट्रेटेड्-लन्दन-न्यूज, 1851*

*कश्चित् क्रेता लीलामयक्रयणाय पङ्क्तिबद्धान् दासान् सावधानं पश्यति। एतस्मिन् चित्रे चतस्रः महिलाः दीर्घशिरस्त्राणधारिणः सप्त पुरुषाः द्वौ बालौ च सन्ति एते सर्वे विक्रयणाय अत्र स्थिताः सन्ति। विपुलधनेन एतेषां क्रीतदासानां क्रयणं भवेत् इति धिया प्रायः ते सुवस्त्राणि धारयित्वा विपणिम् आनीयन्ते स्म।*

# नवदश-शताब्दी (1815-1914)

नवदशशताब्दे विश्वं वेगेन परिवर्तयितुम् आरब्धवत् । आर्थिक-राजनैतिक-सांस्कृतिक-प्राविधिक-कारकैः सम्पूर्णसमाजस्य कलेवरम् एव परिवर्तितम् अपि च विदेशसम्बन्धाः अपि नावीन्यं प्रति नीताः ।

अर्थशास्त्रिणः अन्ताराष्ट्रिये आर्थिकविनिमये त्रिविधप्रवाहाणां गतीनां वा उल्लेखं कृतवन्तः । एतेषु प्रथमः प्रवाहः वाणिज्यस्य भवति यः नवदशशताब्दे मुख्यरूपेण वस्तूनां (गोधूमवस्त्रादिकं) वाणिज्यं यावत् एव सीमितः आसीत् । द्वितीयः, श्रमप्रवाहः भवति । एतस्मिन् प्रवाहे जनाः कार्यस्य आजीविकायाः च अन्वेषणाय एकस्मात् स्थानात् अपरस्थानं प्रति गच्छन्ति । तृतीयः प्रवाहः सम्पत्तेः धनराशेः वा भवति यस्याः निवेशः दीर्घावधये अल्पावधये च दूरस्थ-क्षेत्रेषु क्रियते।

एते त्रयः अपि प्रवाहाः परस्परं सम्बद्धाः आसन् । अपि च जनानां जीवनं प्रभावयन्ति स्म । कदाचित् एतेषां कारकाणाम् आभ्यन्तरे वर्तमानसम्बद्धाः अपि विच्छन्नतां प्राप्नुवन्ति स्म । उदाहरणार्थं, वस्तूनां सम्पत्तेः च गमनागमनयोः अपेक्षया श्रमिकाणां गमनागमने प्रायः अधिकग्लहाः प्रतिबन्धाः च न स्थाप्यन्ते स्म । पुनरपि, यदि वयम् एतेषां प्रवाहाणां सहैव अध्ययनं कुर्याम चेत् नवदशशताब्दस्य विश्वार्थव्यवस्थाम् इतोऽपि सुष्ठुरूपेण अवगन्तुं शक्नुमः ।

## 2.1 विश्वार्थव्यवस्थायाः उदयः

एतं विषयम् अवगन्तुं सर्वादौ औद्योगिक-यूरोपे खाद्य-उत्पादनस्य उपभोगस्य च परिवर्तमान-प्रवृत्याः विषये विचारं कुर्मः चेत् समीचीनं भविष्यति । सामान्यतः सर्वे देशाः भोजनविषये आत्माश्रिताः भवितुं प्रयत्नं कुर्वन्ति । परन्तु नवदशशताब्दे ब्रिटेनविषयकं तथ्यं पृथक् आसीत् । यदि तस्मिन् काले ब्रिटेनः खाद्यस्य विषये आत्माश्रितं भवितुं तादृशीं सरणीम् आश्रयेत् तर्हि तत्रत्यजनानां जीवनस्तरः अपतिष्यत् अपि च सामाजिकावसादः च प्रसृतः अभविष्यत् । आयान्तु, पश्यामः यत् कस्मात् कारणात् एतत् शक्यते स्म ?


अष्टादशशताब्दस्य अन्तिमदशकेषु ब्रिटेनस्य जनसङ्ख्या तीव्रतया वर्धयितुम् आरब्धवती । फलतः, देशे भोजनस्य आवश्यकता अपि वर्धिता । यथा यथा नगराणि अतन्वन् अपि च शिल्पशालाः अपि अतन्वन् , कृषेः उत्पादानाम् अभियाञ्चा अपि वर्धितुम् आरब्धा । कृष्युत्पादाः महार्घतां प्राप्नुवन् । अपरतः सम्पन्नानां भूस्वामिनां प्रभावात् सर्वकारः कणिशस्य आयातम् अपि प्रतिबन्धितं कृतवान् । येषाम् अधिनियमानाम् आश्रयेण सर्वकारेण अयं प्रतिबन्धः स्थापितः, तेषां कॉर्न लॉ इति संज्ञा आसीत् । खाद्यपदार्थानां महार्घतायाः कारणात् समस्याग्रस्ताः उद्योगपतयः अपि च नगरवासिनः जनाः सर्वकारं बाध्यम् अकुर्वन् यत् सः कॉर्न लॉ इत्यस्य शीघ्रं समाप्तिं कुर्यात् ।

कॉर्न-लॉ इत्यस्य निरस्तीकरणात् परम् अत्यल्पमूल्येन खाद्यपदार्थानाम् आयातः आरब्धः । आयातखाद्यपदर्थानाम् उत्पादनस्य व्ययः ब्रिटेने जायमानेभ्यः खाद्यपदार्थेभ्यः अपि न्यूनः आसीत् । फलतः, ब्रिटिशकृषकाणां दुर्गतिः जायमाना आसीत् यतो हि ते आयातसामग्र्याः मूल्येन सह स्पर्धां न कर्तुं शक्नुवन्ति स्म । विशाल-भूभागे कृषिकार्यं पिहितम् आसीत् । सहस्राधिकाः जनाः वृत्तिरहिताः जाताः । ग्रामेभ्यः सर्वं परित्यज्य ते नगराणि प्रविष्टवन्तः तथा च अन्यान् देशान् प्रति गन्तुम् अपि आरब्धवन्तः ।

यदा खाद्यपदार्थानां मूल्यस्य अपचितिः जाता तदा ब्रिटेने उपभोगस्तरः अपि वर्धितः । नवदशशताब्दस्य मध्यकालात् ब्रिटेनस्य औद्योगिक-प्रगतिः पर्याप्त-तीव्रा आसीत् यतः जनानाम् आयस्य वर्धनम् अभवत् । एतस्मात् जनानाम् आवश्यकताः वर्धिताः । खाद्यपदार्थानाम् इतोऽपि अधिकमात्रया आयातः जायमानः आसीत् । पूर्वयूरोपे रूसे अमेरिकायाम् ऑस्ट्रेलियायां विश्वस्य च प्रत्येकस्मिन् भूभागे ब्रिटेनस्य खाद्यापूर्तये भूमीनां स्वच्छीकरणं कृत्वा तत्र कृषिकार्यस्य आरम्भः जातः ।

कृषिकार्यार्थं भूमेः स्वच्छीकरणम् एव पर्याप्तं न आसीत् । कृषियोग्यक्षेत्रं जलपोत-स्थानकैः सह योजयितुं रेलयानानाम् अपि आवश्यकता आसीत् । व्यापकरूपेण सामग्र्याः वहनाय नूतन-रेलमार्गाणां निर्माणम् अपि च पुरातन-रेलमार्गाणां प्रसारणम् आवश्यकम् आसीत् । नवभूमौ कृषिं कर्तुम् इदम् आवश्यकम् आसीत् यत् अन्यक्षेत्रीयाः जनाः तत्र आगत्य वासं कुर्युः । अर्थात् नूतनगृहनिर्माणम् अपि च नवग्रामटिकानां निर्माणम् अपि आवश्यकम् आसीत् । एतेभ्यः सर्वेभ्यः कार्येभ्यः धनराशेः श्रमस्य च आवश्यकता आसीत् । एतदर्थं लन्दनसदृशेभ्यः वित्तीयकेन्द्रेभ्यः पुञ्जेः धनराशेः वा आगमनम् आरब्धम् । अमेरिका-आस्ट्रेलियासदृशेषु स्थानेषु येषां श्रमिकाणाम् आवश्यकता आसीत् तत्र श्रमिकजनान् नीत्वा तेषां स्थायिनिवासः तत्रैव कृतः यतः श्रमस्य निरन्तरप्रवाहः जातः ।

नवदशशताब्दे यूरोपस्य प्रायः पञ्चकोटिजनाः अमेरिकाम् आस्ट्रेलियां च गत्वा तत्रैव वासम् आरब्धवन्तः । मन्यते यत् आविश्वं प्रायः पञ्चदशकोटिजनाः श्रेष्ठभविष्यस्य आकाङ्क्षया आत्मगृहाणि च परित्यज्य दूरस्थदेशान् गत्वा कार्यं कर्तुम् आरब्धवन्तः ।



*चित्रम् – 6 – अमेरिकां प्रति गच्छतः आप्रवासिनः च नयतः जलपोतस्य चित्रम्, एम.डब्ल्यू.रिडले, 1869 ।*



*चित्रम् – 7 – अस्मिन् चित्रे आयरिशस्य आप्रवासिनः यानम् आरोढुं स्वक्रमस्य प्रतीक्षां कुर्वन्तः सन्ति . माइकेलफिट्जजेराल्डः,1874 ।*

1890 तमवर्षं यावत् वैश्विक-कृषिसम्बद्धा अर्थव्यवस्था पुरतः आयाताः आसीत् । अनेन घटनाक्रमेण सहैव श्रमविस्थापने प्रवृत्तौ सम्पत्ति-प्रवाहे पारिस्थितिक्यां प्रविधौ च गभीराणि परिवर्तनानि जातानि आसन् । अधुना भोजनं कस्माच्चित् पार्श्वस्थात् ग्रामात् नैव अपितु सहस्रमीलपरिमिताद् दूरस्थानात् आगन्तुम् आरब्धवत् । अधुना निजक्षेत्रेषु स्वयमेव ये पूर्वं कृषिकार्यं कुर्वन्ति स्म ते अपि अधुना तत्र खाद्यपदार्थानाम् उत्पादनं न कुर्वन्ति स्म । अधुना एतत् कृषिकार्यम् एतादृशाः औद्योगिक-श्रमिकाः कर्तुम् आरब्धवन्तः आसन् ये सम्भवतः सद्य एव तत्र आगतवन्तः आसन् अपि च एतादृशेषु क्षेत्रेषु कार्यं कुर्वन्ति स्म यत्र केवलम् एकः वंशानुक्रमः पूर्वं सम्भवतः गहनेषु वनेषु अस्थाप्यन् । एकस्मात् स्थानात् स्थानान्तरं प्रति खाद्यपदार्थानां वहनाय रेलयानस्य प्रयोगः क्रियते स्म । रेलतन्त्रजालम् एतस्मै कार्याय एव विस्तीर्णम् आसीत् । जलयानैः पदार्थाः एकस्मात् देशात् अपरदेशं प्रति प्राप्यन्ते स्म । एतेषु जलयानेषु दक्षिणयूरोपस्य एशियायाः अफ्रीकायाः कैरीबियायी-द्वीपसमूहस्य च श्रमिकैः न्यून-वेतनेन कार्यं कार्यते स्म ।

### गतिविधिः

कल्पनां करोतु यत् भवान् आयरलैण्डात् अमेरिकाम् आगतः कश्चित् कृषिश्रमिकः अस्ति । एतस्मिन् विषये एकम् अनुच्छेदं लिखन्तु यत् भवान् अत्र आगन्तुं किमर्थं निर्णयम् अकरोत् अपि च भवान् अधुना आजीविकार्थं किं करोति ।

अल्पानि एव स्युः, परन्तु पुनरपि एतादृशानि एव नाटकीय-परिवर्तनानि स्वदेशस्थे पञ्जाबे अपि द्रष्टुं शक्यन्ते । अत्र ब्रिटिशसर्वकारः अर्द्धसैकततलीयभूमेः उर्वरा-क्षमतां वर्धयितुं कुल्यानां जालवत् विस्तारम् अकुर्वन् यतः निर्याताय गोधूमस्य कार्पासस्य च कृषिकार्यं विपुलतया भवितुं शक्नुयात् । येषु स्थानेषु क्षेत्रेषु वा कुल्याभिः सेचनकार्यं भवति स्म तत्र पञ्जाबस्य अन्यस्थानेभ्यः जनाः आनीय स्थापिताः । तेषां वसतयः केनालकॉलोनी (कुल्यावसतिः) इति संज्ञा अभिधीयन्ते स्म ।

भोजनं तु किञ्चन उदाहरणमात्रम् अस्ति । एतादृशी एव कथा कार्पासस्य अपि अस्ति यस्य उत्पादनं विश्वे व्यापकपरिमाणेन कर्तुं जनाः आरब्धवन्तः आसन् यतः ब्रिटिश-वस्त्रोद्योग-आगाराणाम् आवश्यकताः पूर्तिं गन्तुं शक्नुयुः । निर्यासस्य कथा अपि एतस्याः कार्पासकथायाः पृथक् नास्ति । विभिन्नवस्तूनाम् उत्पादने विभिन्नक्षेत्रैः एतावत् वैशिष्ट्यम् अर्जितम् आसीत् यत् 1820तमख्रिस्ताब्दात् 1914तमख्रिस्ताब्दाभ्यन्तरे विश्ववाणिज्ये पञ्चविंशतिगुणितात् चत्वारिंशद्गुणितं यावत् वर्धनं जातम् आसीत् । एतस्मिन् वाणिज्ये प्रायः षष्टिप्रतिशतं भागः प्राथमिक-उत्पादानाम् अर्थात् गोधूमकार्पासप्रभृतीनां कृष्युत्पादानां तथा च कृष्णाङ्गारसदृशानां खनिजपदार्थानाम् आसीत् ।

## 2.2 प्रविधेः भूमिका

एतस्मिन् घटनाक्रमे प्रविधेः का भूमिका आसीत् ? रेलयानस्य वाष्पयानस्य दूरभाषस्य च आविष्कारः प्रचलनं च इति एतादृशानि सर्वाणि अपि प्राविधिकपरिवर्तनानि अतीव महत्त्वपूर्णानि आसन् । एतैः उपर्युक्तसाधनैःविनानवदशशताब्देआगतानांपरिवर्तनानांकल्पनाअपिनकर्तुंशक्यतेस्म।प्राविधिकरूपेण प्रगतिः औन्नत्यं च सर्वाङ्गीणस्य सामाजिकस्य राजनैतिकस्य आर्थिकस्य च विकासस्य परिणामरूपं भवति । उदाहरणार्थम्, औपनिवेशीकरणस्य कारणात् यातायातस्य परिवहनस्य च साधनेषु अपि महान्तः परिष्काराः परिवर्तनानि च जातानि । तीव्रगामीनि रेलयानानि जातानि, भारवाहक-यानप्रकोष्ठानां भारः न्यूनीकृतः, जलपोतानाम् आकारः वर्धितः, यतः कोऽपि उत्पादः कृषिक्षेत्रेभ्यः सुदूरां विपणिं प्रति आनेतुं न्यूनः व्ययः भवेत् अपि च अतीव सारल्येन सः उत्पादः प्रापयितुं शक्नुयात् ।

### गतिविधिः

प्रवाह-तालिकायाः माध्यमेन दर्शयन्तु यत् यदा ब्रिटेनः खाद्यपदार्थानाम् आयातस्य निर्णयम् अकरोत् तदा तस्मात् अमेरिकाम् आस्ट्रेलियां च प्रति पलायनकर्तॄणां जनानां सङ्ख्या किमर्थं वर्धयितुम् आरब्धा ।



**चित्रम् - 8 – द-स्मिथफील्ड-क्लब-पशु-विपणिः,1851,इलस्ट्रेटेड-लन्दन-न्यूज़ इति।**

*पशुमेलापकेषु कृषकाः स्वीयान् पालित-पशून् आनयन्ति स्म तत्र मेलापके तेषां क्रयणं विक्रयणं च भवति स्म। स्मिथफील्ड इत्यस्मिन् लन्दनस्य प्राचीनतमा पशुविपणिः आसीत्। नवदशशताब्दाभ्यन्तरे स्मिथफील्डस्य समीपे काचित् विशाला कुक्कुटविपणिः मांसविपणिः च उद्घाटिता, यतः देशस्य सर्वेभ्यः महद्भ्यः मांसापूर्तिकेन्द्रेभ्यः रेलयानानि गच्छन्ति स्म।*

मांसोत्पादानां वाणिज्येन एतस्याः प्रक्रियायाः समीचीनाकलनं कर्तुं शक्यते। 1870 तमदशकपर्यन्तम् अमेरिकातः यूरोपाय मांसस्य निर्यातः न क्रियते स्म। तस्मिन् काले केवलं जीविताः पशवः एव प्रेष्यन्ते स्म। ते यूरोपतः आनीय एव कर्त्यन्ते स्म। परन्तु जीवितपशूनां कृते अधिकस्थानस्य अपेक्षा भवति स्म। नैके तु यात्राकाले एव म्रियन्ते स्म अथवा रुग्णाः भवन्ति स्म। नैकेषां च भारः अपि न्यूनीभवति स्म अथवा ते भोज्याः न भवन्ति स्म। एतस्मात् कारणात् एव मांसभक्षणं महार्घम् आसीत् अपि च यूरोपीयाः निर्धनाः न तत् भक्षयितुं शक्नुवन्ति स्म। अपरतः, बहूमूल्यवशात् मांसोत्पादानाम् अभियाञ्चा उत्पादनं चापि न्यूनम् एव भवति स्म। नूतने प्रविधौ आगते सति इयं स्थितिः परिवर्तिता। जलपोतेषु खाद्यस्य शीतलीकरणस्य प्रविधिः विकसितः तस्मात् यानि वस्तूनि औष्ण्येन सद्यः विकृतिं लभन्ते स्म, तानि अपि अधुना चिरकालं यावत् सुदीर्घयात्राकाले चापि सुरक्षितानि भवन्ति स्म।



**चित्रम् – 9- मांसम् अलेक्सान्द्रा इत्यस्मिन् जलपोते आरोह्यते, इलस्ट्रेटेड-लन्दन-न्यूज़,1878।**

*मांसस्य निर्यातः तदा एव भवितुं शक्तः यदा जलपोतानां शीतलीकरणस्य व्यवस्था जाता।*

ततः परं तु यात्रापूर्वम् एव पशूनां हननं क्रियते स्म। अमेरिकातः आस्ट्रेलियातः न्यूजीलैण्डादिभ्यः च सर्वेभ्यः स्थानेभ्यः पशूनाम् अपेक्षया तेषां मांसम् एव यूरोपीयदेशान् प्रति प्रेष्यते स्म। एतस्मात् न केवलं समुद्रयात्रायाः व्ययः एव न्यूनः अभवत् अपि तु यूरोपे मांसमूल्यम् अपि अपचितिं गतम्। यूरोपीयाः विपन्नाः अपि पर्याप्तं विविधतापूर्णं खाद्यं प्राप्तुम् आरब्धवन्तः। पूर्वं तेषां पार्श्वे भोक्तुं केवलं पर्युषितरोटिकाः आलुकानि चैव आसन्। अधुना बहूनां जनानां भोजने मांसाहारः अपि सम्मिलितः। जीवनस्थितौ परिष्कृतायां सत्यां शान्तिस्थापना जायमाना आसीत् अपि च अन्येषु देशेषु साम्राज्यवादिसङ्कल्पाः अपि समर्थयितुम् आरब्धाः।

## 2.3 नवदशशताब्दस्य अन्ते उपनिवेशवादः

नवदशशताब्दस्य अन्तिमेषु दशकेषु वाणिज्यं वर्धितम् अपि च विपणिः वेगेन विकसिताः प्रसृता च। अयम् अवधिः केवलं विकसतः वाणिज्यस्य सम्पन्नतायाः चैव न आसीत्। अस्माभिः एतस्याः प्रक्रियायाः नकारात्मकपक्षस्य अपि अवहेलनं न करणीयम्। वाणिज्यस्य वृद्धिः विश्वार्थव्यवस्थया सह सामीप्यस्य परिमाणतः विश्वस्य अनेकेषु भागेषु स्वतन्त्रतायाः आजीविकायाः च साधनानाम् अभावः जनानां जीवने जातः। नवदशशताब्दस्य अन्तिमेषु दशकेषु यूरोपीयाणां विजयात् नैकानि कष्टप्रदायकानि आर्थिकानि सामाजिकानि पारिस्थितिकानि परिवर्तनानि च जातानि अपि च औपनिवेशिक-समाजाः विश्व-अर्थव्यवस्थायां समाहिताः।

किञ्चित् अफ्रीकायाः मानचित्रं पश्यन्तु। तत्र वयं द्रक्ष्यामः यत् तत्रत्यानां केषाञ्चित् देशानां सीमाः तु सर्वथा सरलरेखावत् सन्ति इत्थं प्रतीयते यत् परिमापकेन सा लिखिता स्यात्। दौर्भाग्येण, इदमेव जातम्। अफ्रीकायाः अधिग्रहणप्रयासे नियुक्ताः प्रतिद्वन्द्वि-यूरोपीयाः शक्तयः स्वीयानि स्वीयानि क्षेत्राणि वण्टयितुं प्रायः इमम् एव उपायम् अङ्गीकृतवत्यः। 1855 तमे वर्षे यूरोपीयशक्तिशालि-देशानां वर्लिनमध्ये उपवेशनम् अभवत् यत्र अफ्रीकायाः मानचित्रे एतादृशाः रेखाः आकृष्य तस्य परस्परं वण्टनं कृतम्।

नवदशशताब्दस्य अन्तिमे काले ब्रिटेनदेशेन फ्रान्सदेशेन च स्वशासित-विदेशि-क्षेत्रफलस्य विपुलं वर्धनं कृतम् आसीत्। बेल्जियमः जर्मनी च नूतन-औपनिवेशिक-शक्तीनां रूपेण पुरतः समायातौ। पूर्वं स्पेनदेशेन अधिकृतानाम् उपनिवेशानाम् अधिग्रहणं कृत्वा 1890 तमदशकस्य अन्तिमेषु वर्षेषु संयुक्तराज्य-अमेरिका अपि औपनिवेशिक-शक्तिरूपेण जाता।

आयान्तु पश्यामः यत् उपनिवेशवादात् औपनिवेशिक-समाजानाम् अर्थव्यवस्थायाः आजीविकायाः च संसाधनेषु कीदृशाः प्रभावाः अभवन्।




*चित्रम् – 10 –नवदशशताब्दस्य उत्तरार्द्धे औपनिवेशिक-अफ्रीकायाः मानचित्रम्।*

## द्वितीया मञ्जूषा

**मध्य-अफ्रीकायां सरहेनरीमार्टन-स्टैनली**


स्टैनलीमहोदयः कश्चित् पत्रकारः अन्वेषकः च आसीत्। न्यूयॉर्क-हैराल्डमहोदयः तं बहुभ्यः वर्षेभ्यः पूर्वं अफ्रीकां गतस्य लिविङ्गस्टन-नामकस्य धर्मप्रचारकस्य अन्वेषणाय प्रेषितवान्। तस्मिन् काले अन्येषां यूरोपीय-अन्वेषकाणाम् इव स्टैनलीवर्यः अपि सशस्त्रं तत्र अगच्छत्। तत्र गत्वा सः तत्र स्थानीयान् आखेटकान् योद्धृन् श्रमिकान् च सङ्घीकृतवान्, स्थानीयकुटुम्बैः सह युद्धम् अकरोत्। अफ्रीकीयभूदृश्यस्य च निरीक्षणम् अकरोत्, विभिन्नक्षेत्राणां मानचित्राणि च अरचयत्। अनन्तरकाले एतैः अन्वेषणैः अविष्कारैः च अफ्रीकां जेतुं सौकर्यं जातम्। एतादृशैः भौतिकैः अन्वेषणैः केवलं वैज्ञानिकसूचनाः एकत्रीभवेयुः इति एतादृश्या सामान्यया इच्छया एव तानि प्रेरितानि न भवन्ति स्म। तेषाम् अन्वेषणानां साम्राज्यवादि-योजनाभिः सह प्रत्यक्षसम्बन्धः भवति स्म।



*चित्रम् – 11 - मध्याफ्रीकायां सरहेनरीमार्टनस्टैनली तस्य च सङ्घः. इलस्ट्रेटेड-लन्दन-न्यूज, 1871।*

## 2.4 रिण्डरपेस्ट इति अथवा पशु-प्लेगरोगः

अफ्रीकायां 1890 तमदशके रिण्डरपेस्ट इति नामधेयः रोगः सर्वत्र वेगेन प्रसृतः। पशुषु यथा प्लेगरोगस्य विस्तारः भवति तथैव जनेषु अयं रोगः अपि विस्तारं प्राप्नोति। अनेन रोगेण जनानाम् आजीविका स्थानीयार्थव्यवस्था चापि अतीव प्रभाविता। यूरोपीय-साम्राज्यवादि-शक्तयः कथम् औपनिवेशिक-समाजान् प्रभावितवत्यः इदं वयम् अनेन उपर्युक्तेन उदाहरणेन अवगन्तुं शक्नुमः। अनेन उदाहरणेन ज्ञायते यत् आक्रमणानां विजयानां च अस्मिन् युगे दुर्घटनावशात् यः पशुरोगः प्रसृतः तेन अपि सहस्राधिकं जनानां जीवनं भाग्यं च परिवर्तितं तथा च विश्वेन सह तादृशानां विपत्तिग्रस्तानां जनानां सम्बन्धाः अपि परिवर्तिताः।




***चित्रम् – 12 – ट्रान्सवाल-स्वर्ण-आकरान् यावत् गमनागमनम्, द ग्राफिक,1887।***

*बिल्जनद्याः पारेगमनं ट्रान्सवालस्य सुवर्णस्य आकरान् यावत् प्राप्तुं लघुतमः सरलतमः च मार्गः आसीत्। विट्वॉटर्सरैंड इत्यस्मिन् सुवर्णस्य अन्वेषणात् परं तु रोगाणां मृत्योः आशङ्कायाः परं तथा च मार्गस्य काठिन्यानानाम् अनन्तरं यूरोपस्य जनाः तत् क्षेत्रं प्रति धावितवन्तः आसन्। 1890 तमदशकं यावत् सम्पूर्णे विश्वे सुवर्णस्य उत्पादने अफ्रीकायाः भागः 20 प्रतिशतात् अपि अधिकः जातः आसीत्।*

प्राचीनकालात् एव अफ्रीकायां भूमेः सम्बद्धा काचित् न्यूनता न आसीत् अपरञ्च तत्रत्याः जनसङ्ख्या अतीव अल्पा आसीत्। शताब्दान् यावत् अफ्रीकीयानां जीवनं व्यवसायाः च भूमेः पालितपशूनां च साहाय्येन एव प्रवर्तते स्म। तत्र वेतनभोगिनां प्रचलनं नासीत्। नवदशशताब्दस्य उत्तरार्द्धे अफ्रीकायाम् एतादृशानि उपभोक्तृवस्तूनि अत्यल्पानि आसन् यानि वेतनधनेन क्रेतुं शक्यानि भवेयुः। यदि भवन्तः अफ्रीकीयाः कृषकाः अभविष्यन् अपि च भवतां पार्श्वे भूमिः पशवः च अभविष्यन् – यस्याः भूमेः पशूनां च तत्र कापि न्यूनता न आसीत् – तर्हि भवन्तः अपि अनेन तथ्येन वैमत्यम् एव प्रकटयिष्यन्ति यत् वृत्यर्थं वेतनाय वा कार्यकरणस्य का आवश्यकता अस्ति।

नवदशशताब्दस्य अन्तिमे काले यूरोपीयाः शक्तिमन्तः जनाः अफ्रीकायाः विशालानि भूक्षेत्राणि खनिज-आकरणानि च दृष्ट्वा एतत् महाद्वीपं प्रति आकृष्टाः। यूरोपीयाः जनाः अफ्रीकायाम् उद्यानीयं कृषिकार्यम् आकराणां च दोहनं कर्तुम् इच्छन्ति स्म, यतः ताः सामग्रीः पुनः यूरोपं प्रति प्रेषयितुं शक्नुयुः। परन्तु तत्र काचित् एतादृशी समस्या पुरतः समायाता यस्याः आगमनस्य प्रायः सम्भावना न आसीत्। तत्रत्याः जनाः मासिकवेतनेन कार्यं न कर्तुम् इच्छन्ति स्म।

श्रमिकाणां नियुक्तिविषये, स्वामिनाम् अधीनत्वे च एव श्रमिकाः कार्यं कुर्युः इति एतदर्थं स्वामिनः नैकान् उपायान् कृतवन्तः परन्तु पुनरपि ते स्वामिनः साफल्यं न अवाप्तवन्तः। श्रमिकाः अधुना प्रभूतं राजस्वं दास्यन्ति इति एतादृशी व्यवस्था तत्र स्वामिभिः उपकल्पिता। कराणां प्रत्यर्पणं केवलं तदा एव कर्तुं शक्यते स्म यदा करदाता उद्यानेषु आकरेषु च कार्यं करोति स्म।



**चित्रम् – 13 – दक्षिणाफ्रीकायाः ट्रान्सवाल-सुवर्ण-आकरेषु खननं कुर्वन्तः श्रमिकाः, द ग्राफिक, 1875 इति।**

कृषिजीविनाम् अधिकारः चिरकालं यावत् तेषां भूमिषु न भवेत् अतः तान् भूमेः अपाकर्तुम् उत्तराधिकारस्य अधिनियमाः अपि परिवर्तिताः। नूतने अधिनियमे इयं व्यवस्था प्रकल्पिता यत् अधुना कुटुम्बस्य केवलस्य एकस्य सदस्य एव पैतृकसम्पतौ अधिकारः भविष्यति। अस्य अधिनियमस्य माध्यमेन कुटुम्बस्य अन्येषां जनानां श्रमविपणिं प्रति बलात् प्रेषयितुं प्रयासः कृतः। आकरकर्मिणः व्रजे बद्धाः। ते स्वतन्त्रतया न कुत्रापि भ्रमितुं शक्नुवन्ति स्म तेषां तथा भ्रमणं प्रतिबन्धितम्।

तदा एव तत्र "रिण्डरपेस्ट" इति नामकः विनाशकारी पशुरोगः सर्वत्र प्रसृतः।

अफ्रीकायां रिण्डरपेस्ट इति रोगः सर्वप्रथमं 1880 तमदशकस्य अन्तिमेषु वर्षेषु दृष्टः। तस्मिन् काले ये इतालवी-सैनिकाः अफ्रीकायाम् एरिट्रियादेशम् अभिलक्ष्य आक्रमणं कुर्वन्ति स्म तेषां भोजनसम्बद्धाम् आवश्यकतां पूरयितुम् एशियादेशेभ्यः पशवः आनीयन्ते स्म। अयं रिण्डरपेस्टनामकः रोगः ब्रिटिश-आधिपत्ययुक्तेभ्यः देशेभ्यः आनीतपशूनां माध्यमेन एव अत्र प्राप्नोत्। अफ्रीकायाः पूर्वभागात् महाद्वीपं प्रति प्रविशन् अयं रोगः दावाग्निः इव पश्चिमाफ्रीकां प्रति वर्धयितुम् आरभत। 1892 तमख्रिस्ताब्दे अयं रोगः अफ्रीकायाः अटलाण्टिक-तटं यावत् प्राप्नोत्। पञ्चभिः वर्षैः अयं केपं(अफ्रीकायाः नितान्तं दक्षिणभागः) यावत् अपि प्राप्नोत्। रिण्डरपेस्टः इति रोगेण आक्रान्ताः नवतिप्रतिशतं पशवः मृत्युम् उपागताः।

पशुषु नष्टेषु सत्सु तु अफ्रीकायाः आजीविकायाः साधनानि एव समाप्तानि। स्वीयं शासनं द्रढीभवेत् अफ्रीकीया जनाः च श्रमजीविनः भवेयुः इति धिया तत्रत्याः उद्यानस्वामिनः आकरस्वामिनः औपनिवेशिक-सर्वकारः च अवशिष्टपशून् अपि अधिगृहीतवान्। अवशिष्टानि पश्वादिसंसाधनानि अधिग्रह्य यूरोपीय-उपनिवेशकाराः चिन्तितवन्तः यत् सम्पूर्णम् अफ्रीकादेशं जेतुं जनान् च दासीकर्तुम् अयम् अधिग्रहणरूपः उपायः श्रेष्ठः अस्ति।

नवदशशताब्दे विश्वस्य अन्येषु भागेषु पश्चिमाक्रमणस्य विजयस्य च परिणामरूपाः एतादृश्य एव इतोऽपि कथाः द्रष्टुं शक्यन्ते।

## 2.4 भारतात् अनुबन्धितानां श्रमिकाणां गमनम्

भारतात् अनुबन्धितानां श्रमिकाणां नयनम् अपि नवदशशताब्दस्य विश्वस्य विविधतां प्रतिबिम्बितां करोति। तीव्रया आर्थिकवृद्ध्या सह जनतायाः कष्टानाम् अभिवर्धनं, केषाञ्चित् जनानाम् आयस्य वर्धनं, केषाञ्चित् च जनानाम् अत्यन्तं विपन्नावस्था, केषुचित् क्षेत्रेषु च पर्याप्त-प्रविधेः अभिवृद्धिः, केषुचित् क्षेत्रेषु च उत्पीडनस्य नूतनरूपाणां प्रवर्तनम् इति एतत् सर्वं तस्मिन् नवदशशताब्दे जातम्।

नवदशशताब्दे भारतस्य चीनस्य च लक्षाधिकाः श्रमिकाः उद्यानेषु राजमार्गेषु आकरेषु रेलपरियोजनासु च कार्यार्थं सुदूरदेशान् प्रति नीयन्ते स्म। भारतीयाः अनुबन्धिताः श्रमिकाः विशिष्ट-प्रकारकाणाम् अनुबन्धानां माध्यमेन नीयन्ते स्म। एतेषु अनुबन्धेषु अयं ग्लहः पणबन्धः वा भवति स्म यत् यदि श्रमिकाः निजस्वामिनः उद्याने पञ्च वर्षाणि यावत् निरन्तरं कार्यं करिष्यति तर्हि तादृशः श्रमिकः पुनः स्वदेशं प्रति आगन्तुं शक्नोति।

भारतस्य अधिकतराः अनुबन्धिताः श्रमिकाः वर्तमानात् पूर्वोत्तरप्रदेशात् बिहारात् मध्यभारतात् तमिलनाडु-राज्यस्य च शुष्कक्षेत्रेभ्यः गच्छन्ति स्म। नवदश-शताब्दस्य मध्ये एतेषु क्षेत्रेषु महत् परिवर्तनं जायमानम् आसीत्। कुटीरोद्योगाः समाप्तिं प्रति गच्छन्ति स्म।

भूमेः भाटकं वर्धितम् आसीत्। आकराणाम् उद्यानानां च कृते भूमेः कण्टकादीनां च कर्तनं कृत्वा तस्याः स्वच्छीकरणं क्रियते स्म। एतैः परिवर्तनैः निर्धनानां जीवने गहनः प्रभावः जातः। ते भाटकेन भूमिं तु स्वीकुर्वन्ति स्म परन्तु तस्याः भाटकम् अर्पयितुं न पारयन्ति स्म,अतः ते ऋणिनः भवन्ति स्म। कार्यस्य अन्वेषणाय ते निजगृहाणि परित्यक्तुं बाध्याः जाताः।



चित्रम् – 14 – त्रिनिदाद-देशस्य कस्मिंश्चित् कोको इत्यस्य उद्याने कार्यं कुर्वाणाः भारतीयाः अनुबन्धिताः श्रमिकाः, नवदशशताब्दस्य पूर्वार्द्धम्।

भारतीय-अनुबन्धितश्रमिकाः मुख्यरूपेण कैरीबियायी-द्वीपसमूहं मारिशसदेशं फिजी-देशं च प्रति नीयन्ते स्म। तमिल-आप्रवासिनः सीलोनदेशं मलायादेशं च नीयन्ते स्म तत्र ते कार्ये नियोज्यन्ते स्म। नैके अनुबन्धित-श्रमिकाः असमस्य चाय-उद्यानानि प्रति कार्यार्थं नीयन्ते स्म।

स्वामिनां सहायकाः श्रमिकान् कार्ये नियोजयन्ति स्म। सहायकाः आयोगधनं प्राप्नुवन्ति स्म। बहवः आप्रवासिनः तेषां ग्रामे यत् उत्पीडनं तेषां भवति स्म तस्मात् मुक्तये, अपि च निर्धनतातः मुक्तये अपि एतादृशान् अनुबन्धान् अङ्गीकुर्वन्ति स्म। सहायकाः अपि आप्रवासिजनान् लोभयितुं वञ्चयितुं च सत्यतथ्यानाम् उपस्थापनं तेषां पुरतः कुर्वन्ति स्म। कुत्र गन्तव्यं , यात्रार्थं कानि साधनानि भविष्यन्ति अपि च किं कार्यं करणीयम् अपि च नूतनस्थाने कार्यस्थितयः वातावरणं च कीदृशं भविष्यति इति एतस्मिन् विषये यथार्थसूचनाः न दीयन्ते स्म। नैके आप्रवासिनः च एतस्मिन् विषये अपि न सूच्यन्ते स्म तैः दीर्घतमा समुद्रयात्रा करणीया। यदि कदाचित् कश्चित् श्रमिकः अनुबन्धाय सिद्धः न भवति स्म तदा विदेशि-सहायकाः तस्य अपहरणम् अपि कुर्वन्ति स्म।

## चर्चां कुर्वन्तु –

राष्ट्रियस्य अभिज्ञानस्य निर्माणे भाषायाः लोकपरम्परायाः च महत्त्वविषये चर्चां कुर्वन्तु।

नैके जनाः अवदन् यत् नवदशशताब्दीया इयम् अनुबन्ध-व्यवस्था नूतनदासप्रथा इति अस्ति। उद्यानेषु कार्यस्थलेषु प्राप्तेषु सत्सु एव श्रमिकाः वास्तविकतया अवगच्छन्ति स्म यत् यथा यादृशीम् आशां ते कुर्वन्ति स्म तादृशी स्थितिः अत्र कार्यस्थले नास्ति। अस्मिन् नूतने स्थाने जीवनस्य कार्यस्य च अवस्थाः कठोराः आसन् अपि च श्रमिकाणां पार्श्वे अधिनियमाधिकाराः लेशमात्रम् अपि न आसन्। पुनरपि श्रमिकाः आत्मकल्पितां पृथक् जीवनशैलीम् आविष्कृतवन्तः। अनेके तु पलायित्वा वनानि प्रति गतवन्तः। यदि एतादृशाः पलायनवादिनः श्रमिकाः निगृह्यन्ते स्म तदा ते भृशं दण्ड्यन्ते स्म। अनेके तु आत्मनः प्राचीन-नवीन-संस्कृत्योः सम्मिश्रणं कुर्वाणाः वैयक्तिक-आत्माभिव्यक्तेः सामूहिक-आत्माभिव्यक्तेः च नूतनरूपाणि आविष्कृतवन्तः। त्रिनिदाद-मध्ये मुहर्रम-उत्सवस्य वार्षिकसम्प्रचलनं कस्यचित् विशाल-उत्सवस्य मेलापकस्य रूपेण परिवर्तितः। एतस्य मेलापकस्य नाम होसे (इमाम हुसैन इति नाम्नः) इति कृतम्। एतस्मिन् मेलापके सर्वेषां धर्माणां जातीनां च श्रमिकाः भागं गृह्णन्ति स्म। अनेन एव प्रकारेण रास्ताफारियानवाद-नामके विद्रोहे धर्मे अपि भारतीय-आप्रवासिनां कैरीबियायी-द्वीपसमूहस्य च मध्ये एतेषां सम्बन्धानां च दिग्दर्शनं कर्तुं शक्यते। त्रिनिदादे गुयानायां च प्रसिद्धं चटनीम्यूजिक इत्यपि भारतीय-आप्रवासिनां तत्र प्राप्तेः परं पुरतागतानां रचनात्मक-अभिव्यक्तीनां च एव उदाहरणम् अस्ति। सांस्कृतिक-उत्सवानाम् एतादृशानि स्वरूपाणि कस्याश्चित् नूतनायाः वैश्विक- उदयस्य प्रक्रियायाः एव अङ्गरूपेण आसन्। इयं काचित् एतादृशी प्रक्रिया आसीत् यत्र पृथक् पृथक् स्थानीयानि वस्तूनि परस्परं सम्मिश्रितानि भवन्ति स्म, तेषां मूलपरिचयः अपि च विशिष्टताः अपि निलीनाः समाप्ताः वा भवन्ति स्म अपि च सर्वथा नव्यरूपं पुरतः आयाति स्म।




**चित्रम् – 15 – अभिज्ञानार्थम् अनुबन्धितश्रमिकाणां चित्राणि।**
*स्वामिनां कृते एतेषां श्रमिकाणां नामानि नैव अपितु एतेषां सङ्ख्या एव महत्त्वं दधाति स्म।*

अधिकतराः अनुबन्धितश्रमिकाः अनुबन्धे समाप्ते सति अपि पुनः स्वदेशं प्रति न आगतवन्तः तेषु ये पुनः अत्र आगतवन्तः तेषु अपि पुनः अधिकतराः केवलं किञ्चित् कालम् अत्र यापयित्वा पुनः आत्मनः कृते नवकार्यस्थलानि प्रति गतवन्तः। एतस्मात् कारणात् एतेषु देशेषु भारतीयमूलस्य जनानां सङ्ख्या आधिक्येन अस्ति। किं भवन्तः नोबेल-पुरस्कार-विजेतुः साहित्यकारस्य वी.एस.लायपॉलस्य नाम श्रुतवन्तः ? भवत्सु कैश्चित् वेस्ट-इण्डीजस्य क्रिकेटक्रीडकयोः शिशनरैनचन्द्रपॉल-रामनरेशसरवयोः नाम श्रुतं स्यात्। किं भवन्तः कदाचित् अनुभवन्ति यत् एतेषाम् उपर्युक्तानां त्रयाणां नामानि भारतीय-नामानि इव किमर्थं सन्ति ? कारणं तत्र एतद् एव अस्ति यत् ते भारतात् गतानाम् अनुबन्धित-श्रमिकाणाम् एव वंशजाः सन्ति।



*चित्रम् – 16 – कस्यचित् अनुबन्धित-श्रमिकस्य अनुबन्धपत्रम्।*

विंशतिशताब्दस्य आरम्भिककालात् एव अस्माकं देशस्य राष्ट्रवादिनः नेतारः एतस्याः प्रथायाः विरोधं कर्तुम् आरब्धवन्तः आसन्। तेषां मतानुसारम् इयम् अतीव अपमानजनिका क्रूरा च व्यवस्था आसीत्। एतादृशात् प्रभाववशात् एव 1921 तमे वर्षे एषा व्यवस्था समापिता। परन्तु ततः परम् अपि नैकदशकान् यावत् भारतीय-अनुबन्धितानां श्रमिकाणां वंशजाः कैरीबियायीद्वीपसमूहे व्यथित-अल्पसङ्ख्यकानां जीवनं यापितवन्तः। तत्रत्याः जनाः तान् श्रमजीविरूपेण एव मन्यन्ते स्म अपि च तैः सह श्रमिकवत् एव व्यवहारं कुर्वन्ति स्म। नायपॉलस्य केषुचित् प्रारम्भिकेषु उपन्यासेषु वियोगस्य अनात्मीयतायाः च एषः भावः बहुतरः द्रष्टुं शक्यते।

**स्रोतः – क**

**कस्यचित् अनुबन्धित-श्रमिकस्य आत्मानुभवः अथवा आत्मकथा**

रामनारायणतिवारी भारतात् गतः कश्चित् अनुबन्धित-श्रमिकः आसीत् यः विंशतिशताब्दस्य आरम्भे डेमेरारा इत्यत्र दशवर्षाणि यावत् कार्यम् अकरोत्। तस्य संस्मरणस्य कश्चन भागः ---

बहुप्रयासे कृते सति अपि अहं तानि कार्याणि समीचीनतया न कर्तुं शक्तवान् यानि मह्यं दत्तानि आसन्। केषाञ्चन दिनानाम् आभ्यन्तरे मम हस्तौ पादौ च व्रणितौ जातौ, अपि च सप्ताहं यावत् अहं कार्यं कर्तुं न शक्तवान् एतस्मात् कारणात् अहं दण्डितः अपि च चतुर्दशदिनानि यावत् कारागारे अहं प्रवेशितः। इत्थं नवाप्रवासिनः कार्यं कर्तुं काठिन्यम् अनुभवन्ति स्म अपि च ते सम्पूर्णे दिने प्रदत्तं कार्यं न समापयितुं पारयन्ति स्म। यदि कार्यं सन्तोषजनकं न भवति स्म तदा वेतनम् अपि न्यूनम् एव लभ्यते स्म तथा च विविधदण्डैः ते दण्ड्यन्ते स्म। वस्तुतः श्रमिकाः स्वीयम् श्रमानुबन्धस्य अवधिम् अतीव काठिन्येन एव निर्वोढुं बाध्याः भवन्ति स्म।

स्रोतः वाणिज्यम् एवं च उद्योगविभागः, आप्रवासनशाखा, 1916।

## 2.5 विदेशे भारतीयाः उद्यमिनः


विश्वविपणये खाद्यपदार्थान् सस्यानि च उत्पादयितुं सम्पत्तेः आवश्यकता आसीत्। महद्भ्यः उद्यानेभ्यः तु विपणेः वित्तकोषेभ्यः च धनं स्वीकर्तुं शक्यते स्म। परन्तु निर्धनकृषकाणां जीवनं तु कठिनम् आसीत्।

इतः एव स्वदेशिनः श्रेष्ठिनः अपि च महाजनाः दृष्टिपथम् आयान्ति। किं भवन्तः शिकारीपूरी-श्रॉफ इति अपि च नट्टूकोट्टई-चेट्टियार इति एतेषां च विषये श्रुतवन्तः स्युः ? एते तेषु नैकेषु वित्ताधिकारिषु वणिक्षु च आसन् ये मध्य-एशियायां पूर्व-एशियायां च निर्यातोन्मुखिनः कृषिकार्याय ऋणरूपेण धनं यच्छन्ति स्म। एतदर्थं ते कदाचित् तु स्वकोषतः धनं योजयन्ति स्म कदाचित् च यूरोपीय-वित्तकोषेभ्यः ऋणं स्वीकुर्वन्ति। तेषां पार्श्वे सुदूरदेशं यावत् धनं प्रापयितुं काचित् सुव्यवस्थिता पद्धतिः भवति स्म। तैः तु व्यावसायिक-सङ्घटनानां क्रियाकलापानां च देशीय-स्वरूपाणि अपि विकसितानि आसन्।

अफ्रीकायां यूरोपीय-उपनिवेशकारान् अनु भारतीयाः वणिजः महाजनाः चापि प्राप्तवन्तः। हैदराबादिनः सिन्धिनः वणिजः तु यूरोपीयेभ्यः उपनिवेभ्यः चापि अग्रे प्राप्तवन्तः। 1860 तमदशकात् ते सम्पूर्णे संसारे पोतस्थानकेषु स्वीयानि महान्ति एम्पोरियम इति उद्घाटितवन्तः। एतेभ्यः आपणेभ्यः पर्यटकाः आकर्षकाणि स्थानीयानि वैदेशिकानि च वस्तूनि प्राप्नुवन्ति स्म। इदं कश्चित् विकसन् व्यवसायः आसीत्। यतो हि सुरक्षितेषु आरामदायकेषु च जलपोतेषु आगतेषु सत्सु पर्यटकानां सङ्ख्या अनुदिनं वर्धयितुम् आरब्धवती।

## 2.6 भारतीयं वाणिज्यम् उपनिवेशवादः वैश्विकव्यवस्था च

भारते जायमानस्य सूक्ष्मकार्पासस्य यूरोपीयदेशेभ्यः निर्यातः क्रियते स्म। औद्योगीकरणात् परं ब्रिटेने अपि कार्पासस्य उत्पादनं वर्धयितुम् आरभत। एतस्मात् कारणात् एव तत्रत्याः उद्योगपतयः सर्वकारं प्रति बलपूर्वकम् इमं विषयम् उपस्थापितवन्तः यत् सः कार्पासस्य आयातं प्रतिबन्धितं कुर्यात् अपि च स्थानीयानां उद्योगानां रक्षणं कुर्यात् इति। फलतः



**चित्रम् – *17* – ईस्ट-इण्डिया-कम्पनी-भवनम्, लन्दनम्।**
*ईस्ट-इण्डिया-कम्पनी इत्यस्य आ विश्वं यानि कार्याणि जायन्ते स्म तेषां सर्वेषां केन्द्रम् एतत् एव आसीत्।*

ब्रिटेने आयातवस्त्रेषु सीमाशुल्कम् आरोपितम्। तत्र सूक्ष्मस्य भारतीय-कार्पासस्य आयातः न्यूनः अभवत्।

नवदशशताब्दस्य आरम्भात् एव ब्रिटिशवस्त्रोत्पादकाः अन्येषु देशेषु अपि स्वीयानां वस्त्राणां विक्रयणाय नूतनानां विपणीनाम् अन्वेषणम् आरब्धवन्तः आसन्। सीमाशुल्कस्य व्यवस्थाकारणात् ब्रिटिश-विपणिभ्यः भारतीय-वस्त्रवाणिज्यं निरस्तं जातं, तस्मात् कारणात् भारतीय-वस्त्रवणिजाम् अपरैः अन्ताराष्ट्रिय-विपणिभिः सह अपि प्रतिस्पर्धा कर्तुं बाध्यता जाता। यदि भारतीयनिर्यातस्य अङ्कानाम् अध्ययनं कुर्मः तर्हि ज्ञायते यत् कार्पासीयवस्त्रस्य निर्यातः नैरन्तर्येण पतनोन्मुखी दृश्यते। 1800 तमख्रिस्ताब्दात् नातिदूरे निर्याते कार्पासीयवस्त्रस्य प्रतिशतं 30 आसीत् यः 1815 तमख्रिस्ताब्दे विकलय्य 15 प्रतिशतं जातः। 1870 तमख्रिस्ताब्दं यावत् तु अयम् अनुपातः केवलं प्रतिशत-त्रयम् इति रूपेण अवशिष्टः आसीत्।

तदा पुनः भारतेन केषां वस्तूनां निर्यातः कृतः ? अङ्कानां माध्यमेन पुनः काचित् नाटकीया कथा पुरतः आयाति। निर्मितवस्तूनां निर्यातः निरन्तरं न्यूनीभवति स्म अपि च तया एव तीव्रतया असाधित-सामग्र्याः निर्यातः अपि वर्धते स्म। 1812 तमख्रिस्ताब्दात् आरभ्य 1871 तमवर्षाभ्यन्तरे असाधित-कार्पासस्य निर्यातः केवलं प्रतिशतं पञ्चतः वर्धित्वा 35 प्रतिशतं यावत् प्राप्नोत्।




**चित्रम् – *18* – सूरत-नगरं, तस्मात् च नातिदूरे प्रवहन्त्याः नद्याः किञ्चित् दृश्यम्।**
**सप्तदशशताब्दस्य काले अष्टादशशताब्दस्य** *आरम्भिकेषु वर्षेषु सूरत-नगरं पश्चिमभारतात् जायमानस्य समुद्र-वाणिज्यस्य मुख्यकेन्द्रम् आसीत्।*

वस्त्राणि रञ्जयितुं प्रयुज्यमानस्य नीलवर्णस्य अपि दशकान् यावत् व्यापकपरिमाणेन निर्यातः (विदेशं प्रति नयनम्) अभवत् । यथा भवद्भिः गतकक्षासु पठितम् एव आसीत्, 1820 तमदशकात् चीनदेशाय व्यापकमात्रया अफेनस्य निर्यातकार्यम् अपि आरब्धम् । स्वल्पकालाय तु भारतीयनिर्याते एव अफेनस्य भागः एव सर्वाधिकः आसीत् । ब्रिटेनसर्वकारः भारते अफेनस्य कृषिकार्यं कारयति स्म अपि च चीनदेशं प्रति तस्य निर्यातं करोति स्म । अफेनस्य निर्यातेन यत् धनं लभ्यते स्म तस्य परिवर्ते चीनात् एव चायस्य अन्येषां च पदार्थानाम् अपि आयातः क्रियते स्म ।

नवदशशताब्दे भारतीय-विपणिषु ब्रिटिश-औद्योगिकानाम् उत्पादानां जलौघवत् स्थितिः आसीत् भारतात् ब्रिटेनं शेषविश्वं प्रति प्रेष्यमाणस्य खाद्यान्नस्य असाधितसामग्र्याः च निर्यातस्य वर्धनम् अभवत् । ब्रिटेनात् भारतं प्रति यानि वस्तूनि प्रेष्यन्ते स्म तेषां मूल्यं भारतात् ब्रिटेनं प्रति प्रेष्यमाणानां वस्तूनां मूल्यस्य अपेक्षया अत्यधिकं भवति स्म । भारतेन सह ब्रिटेनः सदैव व्यापार-अधिशेष इति अवस्थायां भवति स्म । एतस्य अभिप्रायः अयम् अस्ति यत् परस्परं वाणिज्ये सदैव ब्रिटेनः एव आधिक्येन लाभान्वितः भवति स्म । ब्रिटेनः अस्य लाभांशस्य माध्यमेन अन्यैः देशैः सह या वाणिज्यिकी हानिः भवति स्म तस्याः क्षतिपूर्तिं करोति स्म । बहुपक्षयुक्तं प्रबन्धनम् एवमेव कार्यं करोति स्म । एतादृशे प्रबन्धने यदि केनचित् एकेन देशेन सह कृतवाणिज्ये हानिः भवति स्म तदा केनचित् तृतीयदेशेन सह वाणिज्यं कृत्वा ततः अर्जितलाभेन क्षतिपूर्तिः क्रियते स्म । ब्रिटेनस्य वाणिज्ये या हानिः भवति स्म भारतेन तत्र तस्य क्षतिपूर्तिः क्रियते स्म अनेन प्रकारेण भारतेन नवदशशताब्दस्य विश्व-अर्थव्यवस्थायाः रूपस्य निर्धारणे काचित् महत्त्वपूर्णा भूमिका निरूढा आसीत् ।

ब्रिटेनेन सह वाणिज्येन यः अधिशेषः अर्ज्यते स्म तेन तथाकथितस्य होम-चार्जेज् (स्वदेशिव्ययः) इत्यस्य प्रबन्धनं समाधानं वा भवति स्म । एतस्य अन्तर्गतं ब्रितानीयैः अधिकारिभिः वणिग्भिः च निजगृहाणि प्रति यः धनराशिः प्रेष्यते स्म अपि च भारतीयैः कुसीदरूपेण प्राप्त-धनस्य प्रत्यर्पणं, भारते च कृतकार्याः ब्रितानीयाः अधिकारिणः ये सेवानिवृत्ताः आसन् तेभ्यः च सेवानिवृत्तिवेतनम् अपि अनेन एव अधिशेष-धनेन दीयते स्म ।




**चित्रम् – 19 – सप्तदशशताब्दस्य अन्ते भारतस्य शेषविश्वेन सह योजकाः वाणिज्यिकमार्गाः ।**

# महायुद्धकालिकी अर्थव्यवस्था


प्रथमविश्वयुद्धं मुख्यतः यूरोपे एव सम्पन्नम् । परन्तु तस्य प्रभाववशात् सम्पूर्णं विश्वं प्रभावितम् । अस्मिन् अध्याये वयं यान् विषयान् आधारीकृत्य चर्चां कुर्मः तेषां चर्चादृष्ट्या कश्चन महत्त्वपूर्णः प्रभावः अयम् आसीत् यत् अनेन युद्धेन विश्वस्य अर्थव्यवस्था एतादृशे सङ्कटे निपातिता या अर्थव्यवस्था तत्र त्रिभिः दशकैः च व्यवस्थिता जाता । युद्धकाले सम्पूर्णविश्वे सर्वत्र आर्थिकरूपेण राजनैतिकरूपेण च अस्थिरता जाता, अन्ते च मानवाः विनाशकारिणः युद्धकारणात् अतीव दुःखिनः जाताः ।

## 3.1 युद्धकालिकं रूपान्तरणम्

यथा भवन्तः जानन्ति एव, प्रथमविश्वयुद्धं द्वयोः पक्षयोः मध्ये जातम् । एकस्मिन् पक्षे मित्रराष्ट्राणि अर्थात् ब्रिटेनः फ्रान्सः रूसः च आसन् अपरस्मिन् पक्षे च केन्द्रियशक्तिसम्पन्ना देशाः यथा – जर्मनी आस्ट्रिया, हङ्गरी ऑटोमन तुर्की च इति आसन् । 1914 तमख्रिस्ताब्दस्य अगस्तमासे यदा युद्धस्य आरम्भः अभवत् तदा नैके सर्वकाराः एतत् एव अनुभवन्ति स्म यत् युद्धम् अधिकाधिकं क्रिसमस-पर्यन्तं समाप्तिं यास्यति । परन्तु इदं युद्धं तु वर्षचतुष्टयं यावत् प्रवृत्तम् ।

मानवसभ्यतायाः इतिहासे एतादृशं भीषणयुद्धं पूर्वं कदापि न अभवत् । एतस्मिन् युद्धे विश्वस्य श्रेष्ठानि औद्योगिक-राष्ट्राणि परस्परं सङ्घर्षं कुर्वन्ति स्म अपि च शत्रून् हन्तुं तेषां पार्श्वे अपरिमिता आधुनिक-औद्योगिकी शक्तिः सङ्घीभूता आसीत् ।

इदं प्रथमम् आधुनिकम् औद्योगिकयुद्धम् आसीत् एतस्मिन् युद्धे मशीनगन, टैङ्क इति अनयोः, युद्धकविमानानां, रासायनिक-अस्त्राणां च आधिक्येन प्रयोगः जातः । एतानि सर्वाणि वस्तूनि आधुनिकानां विशाल-शिल्पशालानां कारणात् विकसितानि आसन् । युद्धार्थम् आ विश्वम् असङ्ख्यसैनिकाः सेनायां प्रवेशनीयाः आसन् अपि च ते विशालानां जलपोतानां रेलयानानां च माध्यमेन युद्धक्षेत्राणि प्रति आनेतव्याः आसन् । अनेन युद्धेन मृत्योः विनाशस्य च या विभीषिका कल्पिता, तस्याः औद्योगिक-युगात् पूर्वं औद्योगिकशक्तिं च विना कल्पना अपि न कर्तुं शक्यते स्म । युद्धे नवति-लक्षाधिकाः जनाः मृताः कोटिद्वयं च जनाः व्रणिताः जाताः ।



*चित्रम् – 20 – प्रथमविश्वयुद्धकाले कस्याञ्चित् अस्त्रशिल्पशालायां कार्यं कुर्वाणाः श्रमिकाः ।*
*युद्धस्य आवश्यकताः पूरयितुम् अस्त्राणाम् उत्पादने वेगेन वर्धनम् अभवत् ।*

मृतकेषु व्रणितेषु च अधिकतराः व्यवसायिनः जनाः आसन् ते च युवानः आसन् । एतस्य महाविनाशस्य कारणात् यूरोपे कार्यसाधकानां जनानां सङ्ख्या अल्पीयसी जाता । कुटुम्बसदस्यानां सङ्ख्या अपि न्यूना जाता तस्मात् युद्धात् परं कुटुम्बानाम् आयः अपि न्यूनः जातः ।

युद्धसम्बद्धायाः सामग्र्याः उत्पादनाय उद्योगानां पुनर्घटनं कृतम् । युद्धस्य आवश्यकतानुरूपं सम्पूर्णसमाजस्य परिवर्तनं कृतम् । पुरुषाः युद्धभूमिं प्रति गन्तुम् आरब्धवन्तः तथा च यानि पुरुषकार्याणि भवन्ति स्म तानि कार्याणि कर्तुं महिलाः अधुना गृहेभ्यः बहिर्भागं प्रति आगतवत्यः ।

युद्धकारणात् विश्वस्य कासाञ्चित् शक्तिशालिनाम् आर्थिकदेशानां च मध्ये आर्थिकसम्बन्धाः नष्टाः जाताः। अधुना एतादृशाः देशाः अन्योऽन्येन सह प्रतिकारभावनया सङ्घर्षं कुर्वन्ति स्म। एतस्मै युद्धाय ब्रिटेनः अमेरिकीयवित्तकोशेभ्यः अमेरिकीयजनताताः च अपि प्रभूतम् ऋणरूपं धनं स्वीकर्तुं बाध्यः जातः। फलतः, यः अमेरिकादेशः पूर्वम् ऋणग्रहीता आसीत् अधुना ऋणदाता जातः। कथनस्य अयम् अभिप्रायः वर्तते यत् युद्धात् परम् अन्येषु देशेषु अमेरिकायाः तस्य नागरिकाणां च सम्पत्तीनां मूल्यम् अमेरिकायां परेषां देशानां सर्वकाराणाम् अथवा तेषां नागराणां नियन्त्रणयुक्त-सम्पदाभ्यः कुत्रचित् आधिक्येन जाता आसीत्।

## 3.2 युद्धोत्तराः परिष्काराः

युद्धात् परम् आर्थिकस्थितिं समीकर्तुं मार्गः अत्यन्तकठिनः अस्ति इति प्रमाणितम्। युद्धात् पूर्वं ब्रिटेनः विश्वस्य महत्तमायाः अर्थव्यवस्थायाः रूपेण आसीत्। युद्धात् परं महान् सङ्कटः तेन एव सोढव्यः अभवत्। यस्मिन् काले ब्रिटेनः युद्धसङ्कटेन ग्रस्तः आसीत् तस्मिन् काले भारते जापाने च उद्योगाः विकसन्तः आसन्। युद्धात् परं भारतीयविपण्यां पूर्वतन्याः वर्चस्वशालिन्याः स्थितेः प्राप्तिः ब्रिटेनाय अतीव कठिना आसीत्। अधुना तेन जापानेन सह अपि सङ्घर्षः करणीयः आसीत्। युद्धस्य व्ययार्थं ब्रिटेनेन अमेरिकातः विपुलम् ऋणरूपं धनं प्राप्तम् आसीत्। परिणामतः युद्धे समाप्ते जाते सति ब्रिटेनः महता वैदेशिकेन ऋणेन अभिभूतः आसीत्।

युद्धकारणात् आर्थिक-उत्साहस्य वातावरणं जातं यतो हि याचनायाः उत्पादनस्य आजीविकायाः साधनानां च अपि आधिक्येन वर्धनम् अभवत्। परन्तु युद्धस्य कारणात् जातः उत्साहः यदा शान्तः जातः तदा उत्पादनम् अपि पतितुम् आरब्धवत् अपि च आजीविकायाः साधनानाम् अपि नितान्तः अभावः जायमानः आसीत्। अपरतः सर्वकारेण पर्याप्ते युद्धसम्बद्धे सामग्रीव्यये अपि न्यूनता कृता यतः शान्तिकालिक-कराणां माध्यमेन क्षतिपूर्तिः भवितुं शक्नुयात्। एतैः सर्वैः प्रयासैः आजीविका-साधनानि व्यापकरूपेण समाप्तानि। 1921तमख्रिस्ताब्दे प्रत्येकं पञ्चसु श्रमिकेषु एकस्य ब्रिटिश-श्रमिकस्य पार्श्वे कार्यं न आसीत्। आजीविका-विषयिणी चिन्ता व्यग्रता वा तथा च अनिश्चित-युद्धोत्तर-वातावरणस्य अङ्गभूता जाता आसीत्।

नैकाः अर्थव्यवस्थाः कृषेः आधारिताः अर्थव्यवस्था अपि सङ्कटग्रस्ताः आसन्। उदाहरणार्थं गोधूम-उत्पादकानां स्थितेः विषये एव विचारं कुर्मः। युद्धात् पूर्वं पूर्वयूरोपः विश्वविपण्यां गोधूमस्य आपूर्तिकरणे महतः केन्द्ररूपेण आसीत्। युद्धकाले इयम् आपूर्तिः अव्यवस्थिता जाता तदा कनाडायाम् आस्ट्रेलियायाम् अमेरिकायां च गोधूमस्य उत्पादनं सहसा वर्धितुम् आरब्धवत्। परन्तु यथा युद्धं समाप्तम् अभवत्, पूर्वयूरोपे गोधूमस्य उत्पादनं समीचीनं जायमानम् आसीत् अपि च विश्वविपण्यां गोधूमस्य प्रचुरमात्रा जाता। अन्नस्य मूल्यम् अतीवन्यूनं जातम्। ग्रामीणः आयः न्यूनः जातः अपि च कृषकाः गभीरे ऋणसङ्कटे निमग्नाः जाताः।

## 3.3 व्यापक-परिमाणेन उत्पादनम् उपभोगः च

अमेरिकायां परिष्कारस्य गतिः तीव्रा आसीत्। इदं तथ्यं वयं पूर्वम् एव अवगतवन्तः यत् युद्धात् अमेरिकायाः अर्थव्यवस्था कियती लाभान्विता जाता। युद्धात् परं किञ्चित् कालाय

तु अमेरिकीया अर्थव्यवस्था अपि महतीं क्षतिं प्राप्ता परन्तु विंशतितमदशकस्य आरम्भिक-वर्षेभ्यः एव अमेरिकीया अर्थव्यवस्था तीव्रतया औन्नत्यस्य मार्गे वर्धयितुम् आरब्धवती।

1920 तमदशकस्य अमेरिकीयायाः अर्थव्यवस्थायाः महती काचित् विशिष्टता इयम् आसीत् यत् बृहतः उत्पादनस्य प्रवर्तनम्। महत् उत्पादनं प्रति वर्धनस्य क्रमः तु नवदशशताब्दस्य अन्तिमे काले एव आरब्धः आसीत् परन्तु 1920 तमदशके तु इदम् अमेरिकीयस्य औद्योगिकस्य उत्पादनस्य विशेषतारूपेण एव जातम्। कार-निर्माता हेनरीफोर्डः वृहतः उत्पादनस्य विख्यातः प्रणेता आसीत्। सः शिकागो-नगरस्य शूनायाः असेम्बलीलाइन इत्यस्य इव, डेट्रॉयटनगरस्य निज-कार-शिल्पशालायाम् अपि आधुनिकम् असेम्बली-लाइन इत्येतत् स्थापितवान्। शिकागोमध्ये कस्याञ्चित् शूनायां मृतपशून् कन्वेयरबेल्ट इत्यस्मिन् स्थाप्यन्ते स्म अपि च तस्य अपरस्मिन् भोगे स्थिताः मांसविक्रेतारः स्वीयं स्वीयं भागं गृहीत्वा निर्गच्छन्ति स्म। इदं सर्वं दृष्ट्वा फोर्ड-महोदयः अनुभूतवान् यत् यानानाम् उत्पादनाय अपि असेम्बलीलाइन इत्यस्य इव यः उपायः अस्ति सः समयस्य धनस्य च कृते लाभकारी भवितुं शक्नोति। असेम्बलीलाइन इत्यत्र श्रमिकैः समानकार्यं यथा – कारयानस्य कस्यचित् विशिष्टभागस्य संयोजनं, यन्त्रेण पुनः पुनः तदेव समानकार्यकरणम् इति भवति स्म। कार्यस्य गतिः कियती अस्ति एतस्याः अवगमनं कन्वेयर-बेल्ट इति कया गत्या कार्यं कुर्वती अस्ति इत्यस्मात् भवति स्म। अनेन उपायेन कार्यस्य गतिं वर्धयित्वा प्रत्येकं श्रमिकस्य उत्पादकतायाः वर्धनं भवितुं शक्नोति स्म। कन्वेयरबेल्ट इत्यनेन सह स्थिते सति ततः परं कश्चित् अपि श्रमिकः कार्ये शिथिलतां कर्तुं स्वल्पकालाय कार्यावकाशं च अपि न स्वीकर्तुं शक्नोति स्म, एतस्यां कार्यावस्थायां श्रमिकाः परस्परं निजमित्रैः सह अपि वार्तालापं न कर्तुं शक्नुवन्ति स्म। परिणामतः, हेनरी-फोर्ड-शिल्पशालायाः असेम्बलीलाइन इत्यस्मात् निमेष-त्रयाभ्यन्तरे एकं नवीनं कारयानं निर्मीय निर्गच्छति स्म। इतः पूर्वं यैः उपायैः कार्यं क्रियते स्म तेषाम् अपेक्षया इयं निर्माणगतिः नैकगुणिता अधिका आसीत्। टी-मॉडल-नामकं कारयानं बृहदुत्पादनस्य पद्धत्या निर्मितं प्रथमं कारयानम् आसीत्।



*चित्रम् – 21 – शिल्पशालायाः बहिर्भागे पङ्क्तौ स्थितानि टी-मॉडल-वाहनानि।*

आरम्भे फोर्ड-शिल्पशालायाः श्रमिकाः असेम्बलीलाइन-मध्ये श्रमजातां क्लान्तिं सोढुं अतिकाठिन्यम् अनुभूतवन्तः यतो हि ते कार्ययन्त्राणां गतिं न कथमपि न्यूनीकर्तुं नियन्त्रयितुं च शक्नुवन्ति स्म। नैके श्रमिकाः कार्यं परित्यक्तवन्तः। एतादृश्याः बाधायाः समाधानं कथं स्यात् इति चिन्तयन् हताशः फोर्डमहोदयः 1914 तमख्रिस्ताब्दस्य जनवरीमासे श्रमिकाणां वेतनं द्विगुणितम् अर्थात् दैनिकश्रमं 5 डालर इति अकरोत्। अनेन सहैव च सः स्वीयायां शिल्पशालायां (ट्रेडयूनियन) श्रमिकसङ्घानां गतिविधीन् अपि प्रतिबन्धितान् कृतवान्।

वेतनवर्धनेन हेनरीफोर्ड- महोदयस्य आये या न्यूनता जाता ताम् अपाकर्तुं सः स्वीयस्य असेम्बलीलाइन इत्यस्य गतिं पौनःपुन्येन वर्धयितुम् आरब्धवान्। तस्याः ये श्रमिकाः आसन् तेषां कार्यस्य भारः अधिकः जातः। स्वीयेन एतादृशस्य निर्णयस्य कारणात् फोर्डमहोदयः अतीव सन्तुष्टः आसीत्। किञ्चित् कालानन्तरं सः अवदत् – निवेशधनराशिं न्यूनीकरणाय अथवा व्ययं न्यूनीकर्तुं स्वीये जीवने मया एवं सुष्ठुः निर्णयः न कदापि कृतः।

फोर्डमहोदयेन स्वीकृताः उत्पादनस्य पद्धतयः शीघ्रमेव सम्पूर्ण-अमेरिकायाम् अपि प्रयोक्तुम् आरब्धाः। विंशतितमदशके एव यूरोपे अपि तादृशानां पद्धतीनाम् अनुकरणम् अपि जायमानम् आसीत्। बृहदुत्पादनपद्धत्या अभियान्त्रिक्याधारितानां वस्तूनां निर्माणस्य

व्ययः तेषां मूल्यं च न्यूनीकृतम्। समुचित-वेतनस्य कारणात् अधुना नैके श्रमिकाः अपि कार-सदृशानि स्थिराणि उपभोक्तृ-वस्तूनि क्रेतुं शक्नुवन्ति स्म। 1919 तमख्रिस्ताब्दे अमेरिकायां विंशतिलक्षं कारयानानाम् उत्पादनं भवति स्म तत् उत्पादनं 1929 तमख्रिस्ताब्दे वर्धित्वा पञ्चाशत् लक्षाधिकानि कारयानानि प्रतिवर्षं यावत् जातम्। अनेन सहैव नैके जनाः शीतकं वस्त्रशोधनयन्त्रम् आकाशवाणीयन्त्रं दूरभाषयन्त्रं संगीतयन्त्रं च अपि क्रेतुम् आरब्धवन्तः। एतानि सर्वाणि वस्तूनि "हायर-परचेज" महार्घक्रीतवस्तूनि इति व्यवस्थायाः अन्तर्गतं क्रीयन्ते स्म। अर्थात् जनाः एतानि वस्तूनि ऋणं गृहीत्वा क्रीणन्ति स्म तादृशानां महार्घवस्तूनां धनं ते सप्ताहिकरूपेण मासिकरूपेण च विभागशः प्रत्यर्पयन्ति स्म। नूतनेषु गृहेषु निर्मितेषु सत्सु निजगृहाणां सङ्ख्या अपि वर्धिता तस्मात् शीतकानां वस्त्र-शोधकादीनाम् उपकरणानाम् अपि अपेक्षा वर्धिता। ध्यातव्यं यत् गृहाणां निर्माणं क्रयणं च अपि ऋणमाध्यमेन एव भवति स्म।

1920 तमदशके आवासक्षेत्रे निर्माणक्षेत्रे च जातेन वर्धनेन अमेरिकीयसम्पन्नतायाः आधारः कश्चित् जातः आसीत्। गृहाणां निर्माणेन गृह्य-उपयोगिवस्तुषु निवेशेन आजीविकायाः अवसराः अपि याचनाः वर्धन्ते स्म अपि च अपरतः उपभोगः अपि वर्धते स्म। वर्धमानाय उपभोगाय अधिकनिवेशस्य अपि आवश्यकता आसीत्। यतः नूतनाजीविकासाधनानाम् आयस्य च अपि वृद्धिः भवति स्म।

1923 तमे ख्रिस्ताब्दे अमेरिका शेषविश्वाय सम्पत्तेः निर्यातं पुनः कर्तुम् आरब्धवान् अपि च सः विश्वे सर्वाधिकः ऋणदाता देशः जातः। अमेरिकाद्वारा आयातेन सम्पत्तिनिर्यातेन च याः यूरोपीयाः अर्थव्यवस्थाः सङ्कटग्रस्ताः आसन् तासां सङ्कटम् अपाकर्तुं च अपि साहाय्यं कृतम्। अग्रिमैः षड्वर्षैः विश्ववाणिज्यस्य आय-वृद्धि-मात्रायाः च अपि समुचितः परिष्कारः जातः।


परन्तु इयं स्थितिः चिरकालं यावत् स्थिरत्वं न उपागता। 1929 तमवर्षं यावत् विश्वम् एतादृशेन आर्थिकसङ्कटेन ग्रस्तं जातं यस्य सङ्कटस्य अनुभवः विश्वेन पूर्वं न कृतम् आसीत्।

## 3.4 अत्यल्पमूल्यता (महामंदी)

आर्थिकमहामूल्यतायाः आरम्भः 1929 तमख्रिस्ताब्दात् जातः अपि च एषः अवमूल्यरूपः सङ्कटः त्रिंशत्तमदशस्य मध्यकालं यावत् प्राचलत्। तस्मिन् काले विश्वस्य अधिकतरभागानाम् उत्पादनस्य आजीविकायाः आयस्य वाणिज्यस्य च भयानकं पतनम् अङ्कितम्। एतस्याः अत्यल्प-मूल्यतायाः समयः प्रभावः च सर्वेषु देशेषु समानः न आसीत् परन्तु सामान्यतः इत्थं मन्तुं शक्यते यत् कृषिक्षेत्रेषु समुदायेषु च एतस्याः कुप्रभावः सर्वाधिकः आसीत्। इत्थम् एतस्मात् कारणात् अभवत् यतो हि औद्योगिक-उत्पादानां तुलनायां कृष्युत्पादानां मूल्येषु चिरकालं यावत् अत्यधिका न्यूनता जाता।

एतस्याः महामन्दतायाः नैकानि कारणानि आसन्। इदं वयं पूर्वम् एव दृष्टवन्तः यत् युद्धोत्तरविश्वस्य अर्थव्यवस्था कियती दुर्बला आसीत्। प्रथमं तत्र कारणम् इदम् एव आसीत् यत् कृषिक्षेत्रे अत्युत्पादनस्य समस्या पूर्ववत् एव विद्यमाना आसीत्। कृष्युत्पादानां पतनशीलानां मूल्यानां कारणात् स्थितिः इतोऽपि विकृता जाता। मूल्यस्य अपचितिः जाता कृषकाणां च आयः न्यूनतां जायमाना आसीत् तस्मात् आयस्य वर्धनाय कृषकाः उत्पादनं वर्धयितुम् अतिरिक्तप्रयासम् आरब्धवन्तः यतः न्यूनमूल्येन एव स्यात् परन्तु अधिकोत्पादनं कृत्वा ते स्वकीयम् आयस्य स्तरं यथावत् स्थापयितुं समर्थाः भवेयुः इति तेषां चिन्तनम् आसीत्। फलतः, विपण्यां

### तृतीया मञ्जूषा



*चित्रम् – 22 - महामन्दतायाः काले कस्यचित् आप्रवासिनः कृषिजीवि-श्रमिकस्य गृहरहितः बुभुक्षितः कुटुम्बः।*

*सौजन्यम् – लायब्रेरी ऑफ काङ्ग्रेस प्रिंट्स एंड फोटोग्राफ्स डिविज़न इति*

एतस्य चित्रस्य विलेखिका डॉरोथी-लेंग-महोदया एतया बुभुक्षितमात्रा सह निजमेलनस्य क्षणान् स्मरन्ती बहूनां वर्षाणाम् अनन्तरम् अवदत् –

मया सा बुभुक्षिता विपन्ना च महिला दृष्टा तां दृष्ट्वा अहं चुम्बकवत् तस्याः समीपम् अगच्छत्। मया न तु तस्याः अतीतकालस्य विषये पृष्टं न च एव प्रश्नाः कृताः। सा माम् निजं वयः असूचयत्। सा अवदत् यत् सा पञ्चत्रिंशद्-वर्षदेशीया अस्ति। सा अवदत् यत् अहं मम सप्त बालकाः च पार्श्वस्थेषु क्षेत्रेषु शीतकाले उद्धृतान् शाकान् पक्षिणः च खादित्वा जीविताः सन्ति। तस्याः बालकाः पक्षिणः हत्वा आनयन्ति। सा विपन्नमहिला स्वपुत्रं निजक्रोडे निधाय उपविष्टा आसीत्, सा आशास्ते स्म यत् मया विलिखितं चित्रं तस्याः किमपि साहाय्यं कर्तुं शक्नोति अतः तया मम साहाय्यं कृतम्।

स्रोतः --- पॉपुलर फ़ोटोग्राफी, फरवरी, 1960।

कृष्युत्पादानाम् उपलब्धता इतोऽपि वर्धिता । स्पष्टम् अस्ति, मूल्यम् इतोऽपि न्यूनं जातम् । क्रेतॄणाम् अभावात् कृष्युत्पादनं पूतिभावं गतम् ।



***चित्रम् – 23 – अवृत्तिक-लाभस्य प्राप्तये पङ्क्तिबद्धाः जनाः, अमेरिकायाम् । डॉरोथी-लेङ्गद्वारा विलिखितचित्रम्, 1938 ।***

*सौजन्यम् – लायब्रेरी-ऑफ-काङ्ग्रेस-प्रिंट्स-एण्ड-फोटोग्राफ्स-डिविजन । यदा अवृत्तिकानां जनानां गणनया अवगतं यत् देशे कोट्यधिकानां जनानां पार्श्वे कर्तुं किमपि कार्यं नास्ति तदा अमेरिकायाः नैकेषु राज्येषु स्थानीय-प्रशासनस्य पक्षतः वृत्तिरहितेभ्यः जनेभ्यः लघुः धनरूपः सहयोगराशिः दीयमानः आसीत् । एताः दीर्घाः पङ्क्तयः आर्थिक-महामन्दतायाः वर्षेषु निर्धनतायाः अनाजीविकायाः च प्रतीकरूपाः आसन् ।*

द्वितीयं कारणम्, 1920 तमदशकाभ्यन्तरे नैके देशा अमेरिकातः ऋणं स्वीकृत्य स्वीयाः निवेशसम्बद्धाः आवश्यकताः पूरितवन्तः आसन् । यदा स्थितिः समीचीना आसीत् तदा तु अमेरिकातः ऋणस्वीकरणं सरलम् आसीत् परन्तु भाविसङ्कटं दृष्ट्वा अमेरिकायाः उद्यमिनः अपि चिन्ताग्रस्ताः जाताः । 1928 तमख्रिस्ताब्दस्य षड्भ्यः मासेभ्यः पूर्वकालं यावत् विदेशेषु अमेरिकायाः ऋणरूपेण प्रदत्तं धनम् अर्बुद-डॉलर-परिमितम् आसीत् । वर्षाभ्यन्तरे इदम् ऋणं न्यूनीभूय केवलं चतुर्थांशरूपेण जातम् । ये देशाः अमेरिकातः ऋणरूप-धने एव आश्रिताः आसन् तेषां पुरतः गभीरः सङ्कटकालः समुपस्थितः ।

कामं सर्वेषु देशेषु मन्दतायाः समानप्रभावः न स्यात् परन्तु अमेरिकीयसम्पत्तेः प्रत्यागमनेन सम्पूर्णविश्वं कथञ्चित् प्रभावितम् । नैकदेशानां मुद्रामूल्यं कुप्रभावितं तस्य च अवमूल्यनं जातम् । एतस्मात् ब्रिटिश-पावण्ड-मुद्रा अपि प्रभाविता । अमेरिकायाम् अन्यस्थानेषु च कृष्युत्पादानाम् असाधित-सामग्र्याः च मूल्यस्य ह्रासः तीव्रतया जातः । अमेरिकीयसर्वकारः एतस्याः महामन्दतायाः निजार्थव्यवस्थां रक्षयितुम् आयातपदार्थेषु द्विगुणितं सीमाशुल्कं सङ्ग्रहीतुम् आरब्धवान् । अनेन निर्णयेन तु विश्वार्थव्यवस्थायाः कटिभञ्जनम् एव कृतम् ।

औद्योगिकदेशेषु अपि आर्थिकमन्दतायाः कुप्रभावः अमेरिकया एव सोढव्यः अभवत् । अत्यल्पमूल्यतायाः आर्थिकमन्दतायाः च आशङ्कया अमेरिकीयैः वित्तकोशैः ऋणरूपस्य धनदानस्य व्यवस्था प्रतिषिद्धा । यत् ऋणं दत्तम् आसीत् तेषां प्रतिग्रहणस्य प्रक्रिया तीव्रा कृता । कृषकाः कृषेः उत्पादान् न विक्रेतुं पारयन्ति स्म, कुटुम्बव्यवस्था नष्टा, व्यवसायाः नष्टाः । आये न्यूने जाते सति अमेरिकायाः नैके कुटुम्बाः ऋणरूपधनं प्रत्यर्पयितुम् विफलाः जाताः तस्मात् कारणात् तेषां गृहाणि आपणाः कारयानानि सर्वाणि च आवश्यकवस्तूनि लीलामयक्रयेण विक्रीतानि । विंशतितमे दशके या उपभोक्तृवादिनी सम्पन्नता दृश्यते स्म सा सद्य एव धूलियुक्तस्य वायुपुटकस्य इव नष्टा जाता । आजीविकायाः साधनानि नष्टानि, अतः जनाः आजीविकाम् अन्वेष्टुं सुदूरदेशान् प्रति गन्तुम् आरब्धवन्तः । अन्ततः अमेरिकीया वित्तव्यवस्था नष्टा जाता । निवेशेन अपेक्षितलाभस्य अप्राप्तेः, ऋणस्य प्रत्याहरणस्य वैफल्यात्, जनानां च वित्तकोशे रक्षित-धनराशेः च अदानात्, सहस्रशः वित्तकोशाः क्षीणसर्वस्वाः जाताः अपि च वित्तकोषाणां पिधानं जातम् । अनया उपर्युक्ताः परिघटनासम्बद्धाः अङ्काः विस्मापनकारिणः सन्ति , 1933 तमख्रिस्ताब्दं यावत् चतुःसहस्राधिकाः वित्तकोशाः पिहिताः अपि च 1926 तमवर्षारभ्य 1932 तमवर्षाभ्यन्तरे प्रायः 1,10,000 समवायाः सर्वथा नष्टाः ।

यद्यपि 1935 तमवर्षं यावत् अधिकतरेषु औद्योगिकदेशेषु आर्थिकसङ्कटं नष्टुं केचन सङ्केताः दृश्यमानाः आसन् परन्तु समाजेषु अन्ताराष्ट्रिय-सम्बन्धेषु राजनीतौ जनानां मनस्सु च यः आर्थिकमन्दतायाः दुष्प्रभावः आसीत् सः सरलतया न अपगन्तुं शक्नोति स्म ।

## 3.5 भारतम् आर्थिकमन्दता च

यदि वयम् एतस्मिन् विषये अवधानं कुर्मः यत् आर्थिकमन्दतायाः भारते कः प्रभावः जातः तदा एतं विषयं सम्यक्प्रकारेण अवगन्तुं शक्नुमः यत् विंशतिशताब्दस्य आरम्भिककालं यावत् वैश्विक-अर्थव्यवस्था कियती एकीकृता आसीत् । विश्वस्य एतस्मिन् भागे जायमानस्य सङ्कटस्य प्रभावः अन्येषु भागेषु अपि जातः । अनेन अभावेन आविश्वं जनानां जीवनम् अर्थव्यवस्थाः समाजाः च प्रभाविताः भवन्ति स्म ।

यथा भवन्तः पूर्वम् अवगतवन्तः.औपनिवेशिकभारतं कृषिकवस्तूनां निर्यातकं सिद्धसामग्र्याः आयातकरूपेण च जातम् आसीत् । आर्थिकमहामन्दतया भारतीयं वाणिज्यं वेगेन प्रभावितम् । 1920 तमख्रिस्ताब्दात् आरभ्य 1934 तमख्रिस्ताब्दं यावत् देशस्य आयात-वस्तूनां निर्यात-वस्तूनां च मात्रा प्रायः अर्द्धा जाता। यदा अन्ताराष्ट्रियविपण्यां मूल्यक्षयेण आरब्धं तदा भारते अपि मूल्यपतनं जातम्। 1928 तमवर्षाद् आरभ्य 1934 तमवर्षाभ्यन्तरे भारते गोधूमस्य मूल्यं पञ्चाशत् प्रतिशतं यावत् पतितवत्।

नगरीयनिवासिनाम् अपेक्षया कृषकाणां कृषिजीविनां च महती हानिः जाता । यद्यपि कृष्युत्पादानां मूल्यं वेगेन पतितं परन्तु सर्वकारः अवदत् यत् मूल्ये क्षीणे जाते सति अपि राजस्वं तु पूर्ववत् एव दातव्यं भविष्यति । तादृशाः कृषिजीविनः अतीव प्रभाविताः ये विश्वविपणये सस्यानाम् उत्पादनं कुर्वन्ति स्म।

बङ्गाल-प्रान्तस्य शणस्य उत्पादकान् एव पश्येम। ते असिद्धं शणम् उत्पादयन्ति स्म येन शिल्पशालासु शाण-स्यूताः निर्मीयन्ते स्म। यदा शाणस्य निर्यातः अवरुद्धः तदा असिद्ध-शणस्य मूल्ये 60 प्रतिशतात् अपि अधिका न्यूनता आगता। यैः कृषकैः स्वीयस्य उज्ज्वलस्य भविष्यस्य काङ्क्षया अथवा स्वकीय आयस्य वर्धनाय उत्पादनवृद्धये च ऋणरूपं धनं स्वीकृतम् आसीत् तेषां स्थितिः अपि दयनीया जाता, यतो हि उत्पादित-वस्तुनः मूल्यम् अतीव न्यूनं जातम्। अनुदिनम् एतादृशाः कृषकाः ऋणमग्नाः जायन्ते स्म। एताम् आपदं मनसि निधाय बङ्गालस्य कश्चित् कविः अलिखत् –

आयान्तु भ्रातरः ! धनस्य आशया आधिक्येन शणम् उत्पादयन्तु,
सस्यार्थं कृतेन व्ययेन ऋणेन च अभिभूय हताशाः भवन्तु
सम्पूर्णां सम्पत्तिं निवेश्य सस्यानि उत्पादयन्तु
गृहे उपविष्टाः वणिजः मन-परिमितं धान्यं पञ्चरूप्यकैः क्रेष्यन्ति ।

सम्पूर्णे देशे कृषकाः पूर्वापेक्षया अपि अधिकाः ऋणिनः जाताः । धनस्य अधिके व्यये जाते सति तेषां रक्षितधनं समाप्तम् आसीत् , कृषिजीविनः कुशीदकानां पार्श्वे भूमिं न्यासीकृतवन्तः, गृहे यानि अपि आभूषणानि आसन् तेषाम् अपि विक्रयणं कृषिजीविनः कृतवन्तः आसन् आर्थिकमन्दतायाः एतेषु वर्षेषु भारतं बहुमूल्यधातूनां विशेषतया सुवर्णस्य निर्यातम् आरब्धवत्। प्रसिद्धस्य अर्थशास्त्रिणः कीन्स-महोदयस्य मतम् आसीत् यत् भारतीय-सुवर्णस्य निर्यातेन अपि वैश्विक-अर्थव्यवस्थां पुनर्जीवयितुं महत् साहाय्यं कृतम्। अनेन निर्यातेन ब्रिटेनस्य आर्थिकदशा तु निश्चयेन संशोधिता परन्तु भारतीयकृषकाणाम् अनेन कोऽपि लाभः न अभवत्। 1931 तमवर्षे आर्थिकमन्दतायाः चरमोत्कर्षः आसीत् तथा च ग्रामीणभारते असन्तोषः अव्यवस्था च आसीत्। तस्मिन् काले महात्मगान्धी सविनय-अवज्ञा-आन्दोलनम् आरब्धवान्।

एतस्मिन् आर्थिकसङ्कटे अपि नागराः भारतीयाः अधिकं कष्टं न अनुभूतवन्तः । मूल्यस्य अपचये जाते सति अपि नगरनिवासिनां तादृशानां जनानां स्थितिः समीचीना आसीत् येषाम् आयः निश्चितः आसीत्। यथा – नागराः भूस्वामिनः ये स्वभूमेः निश्चितं भाटकीयं धनं प्राप्नुवन्ति स्म, अपि च ये मध्मवर्गीयाः वेतनभोगिनः कर्मचारिणः इति । राष्ट्रवादिजनानां प्रभावात् उद्योगानां रक्षार्थं सीमाशुल्कं वर्धितं यतः औद्योगिक-क्षेत्रीये निवेशे अपि तीव्रता जाता।

### चर्चां कुर्वन्तु –

शणोत्पादकानां विलापस्य प्रसङ्गे शणस्य कृषिकार्येण केषां लाभः जातः ? स्पष्टीकुर्वन्तु।

# विश्वस्य अर्थव्यवस्थायाः पुनर्निर्माणम् - युद्धोत्तरकालः

प्रथम-विश्वयुद्धस्य समाप्तेः केवलं दशकद्वयात् परं द्वितीय-विश्वयुद्धस्य आरम्भः जातः। इदं युद्धम् अपि द्वयोः शक्तिसम्पन्नयोः सङ्घटनयोः मध्ये आसीत्। एतस्मिन् सङ्घटने ध्रुवशक्तिसम्पन्नाः मुख्यतया नात्सी-जर्मनी, जापानः इटली च इति देशाः आसन् अपरस्मिन् पक्षे ब्रिटेनः, सोवियतसङ्घः, फ्रान्सः अमेरिका च इति देशाः आसन् ये च मित्रराष्ट्राणां नाम्ना ज्ञायते स्म। षड्वर्षाणि यावत् एतत् युद्धं प्राचलत् तत् च स्थले जले अन्तरिक्षे च अभवत्।



*चित्रम् – 24 –रूसस्य उपरि आक्रमणं कुर्वन्ति जर्मनस्य सैन्यदलानि, 1941 तमख्रिस्ताब्दस्य जुलै-मासे हिटलरद्वारा कृतम् आक्रमणं युद्धे काचित् निर्णायकस्य महत्त्वस्य घटना आसीत्।*

अस्मिन् युद्धे अपरिमितजनाः मृत्युं प्राप्तवन्तः तथा च महान् विनाशः जातः। इत्थं मन्यते यत् एतस्य युद्धस्य कारणात् प्रत्यक्षरूपेण अप्रत्यक्षरूपेण च उपषट्कोटिः जनाः दिवङ्गताः। अयं मृत्योः अङ्कः वैश्विक-जनसङ्ख्यायाः प्रायः प्रतिशतत्रयम् आसीत्। कोट्यधिकाः जनाः तत्र व्रणिताः जाताः।

अधुना पर्यन्तं युद्धक्षेत्रे मृतानां सङ्ख्या अधिका भवति स्म। एतस्मिन् युद्धे तादृशाः जनाः आधिक्येन मृतवन्तः ये कुत्रापि न युद्ध्यन्ते स्म। यूरोपस्य एशियायाः च विशालाः भूभागाः नष्टाः जाताः। अनेकानि नगराणि यद्धविमानद्वारा यानि विस्फोटकानि भूमौ पातितानि अथवा नैरन्तर्येण शतघ्नी इत्यादिभिः अस्त्रैः ये प्रहाराः कृताः तस्मात् तानि नगराणि सर्वथा नष्टानि। अनेन युद्धेन अपरिमितः आर्थिकः सामाजिकः च विनाशः जातः।

युद्धोत्तरकाले पुनर्निर्माणस्य कार्यं द्वयोः अतिप्रभावसम्पन्नयोः संरक्षणे सान्निध्ये वा अचलत्। पश्चिमविश्वे अमेरिकादेशः आर्थिकस्य राजनैतिकस्य सैनिकबलस्य च दृष्ट्या कस्याश्चित् प्रभावशालिन्याः शक्तेः रूपेण जातः आसीत्। अपरस्मिन् पक्षे सोवियतसङ्घः अपि वर्चस्विनः रूपेण जातः। नात्सीजर्मनीं पराजेतुं सोवियतसङ्घस्य जनता विपुलं बलिदानम् अददात्। यस्मिन् काले पुञ्जीवादिविश्वम् आर्थिकमन्दतया ग्रस्तम् आसीत्। तस्मिन् काले यः पश्चवर्ती अविकसितः कृषेः आश्रितः च सोवियतसङ्घः आसीत्, सोवियतसङ्घस्य जनाः तस्य विकासं कृत्वा तं विश्वस्य शक्तिसम्पन्नदेशानां पङ्क्तौ स्थापितवन्तः।



*चित्रम् – 25 – सोवियतरूसे युद्धेन विनष्टं स्तालिनग्राद इति नगरम्।*

## 4.1 युद्धोत्तरं प्रबन्धनं तथा च ब्रेटन-वुड्स-संस्थानम्

द्वयोः महायुद्धयोः मध्ये आर्थिकैः अनुभवैः अर्थशास्त्रिणः राजनीतिज्ञाः च विषयद्वयम् अवगतवन्तः। प्रथमः विषयः आसीत् यत् उत्पादनाधारितं कञ्चन औद्योगिकसमाजं व्यापकोपभोगेन विना स्थिरं न कर्तुं शक्नुमः। परन्तु व्यापकोपभोगं स्थिरीकर्तुम् इदम् आवश्यकम् आसीत् यत् आयः पर्याप्तः स्थिरः च भवेत्। यदि वृत्तिः अस्थिरा भविष्यति तदा आयः स्थिरः न भवितुं शक्नोति। स्थिरस्य आयस्य कृते पूर्णवृत्तिः अपि आवश्यकी आसीत्।

परन्तु विपणिः पूर्णवृत्तिं दास्यति इति प्रत्याभूतिं न दातुं शक्नोति। मूल्ये उत्पादने वृत्तौ च जायामानम् आरोहावरोहं नियन्त्रयितुं सर्वकारस्य हस्तक्षेपः अपि आवश्यकः आसीत्।

केवलस्य सर्वकारीय-हस्तक्षेपस्य माध्यमेन एव आर्थिक-स्थिरता सुनिश्चेतुं शक्यते स्म।

द्वितीयः पाठः, बाह्यविश्वेन सह आर्थिकसम्बन्धानां विषये आसीत्। पूर्ववृत्तेः लक्ष्यं केवलं तदा प्राप्तुं शक्यते यदा सर्वकारस्य पार्श्वे वस्तूनां सम्पत्तेः श्रमस्य च गमनागमनं नियन्त्रयितुं शक्तिः उपलब्धा स्यात्।

सङ्क्षेपेण, युद्धोत्तरायाः अन्ताराष्ट्रियायाः आर्थिकव्यवस्थायाः मुख्योद्देश्यः अयम् आसीत् यत् औद्योगिकविश्वे आर्थिकस्थिरता पूर्ववृत्ते च अवसराः विद्यमानाः भवेयुः । एतस्मिन् फ्रेमवर्क इत्यस्मिन् 1944 तमख्रिस्ताब्दस्य जुलै-मासे अमेरिकास्थिते न्यू-हैम्पशर इत्यस्य ब्रेटन-वुड्स-नामके स्थाने संयुक्तराष्ट्रमौद्रिके वित्तीयसम्मेलने मतैक्यं जातम् आसीत्।



*चित्रम् – 26 ब्रेटन-वुड्स, अमेरिकास्थितं मावण्ट-वाशिङ्गटन-वसतिगृहम्। एतत् एव तत् स्थानम् अस्ति यत्र ब्रेटन-वुड्स इत्यस्य ऐतिहासिकं सम्मेलनं आयोजितम् आसीत्।*

सदस्यदेशानां विदेशवाणिज्ये यः लाभः कदाचित् च या हानिः जायते तादृश्यां स्थितौ किं भवेत् इति विषयम् अधिकृत्य तत्र ब्रेटन-वुड्स-सम्मेलने एव अन्ताराष्ट्रियमुद्रा-कोषस्य (आई.एम.एफ.) स्थापना कृता। युद्धोत्तर-पुनर्निर्माणाय धनस्य प्रबन्धनाय अन्ताराष्ट्रियपुनर्निर्माणस्य विकासवित्तकोशस्य (सामान्यतया विश्ववित्तकोशः इति शब्देन अभिधीयते )च निर्माणं कृतम्। एतस्मात् कारणात् एव विश्ववित्तकोशं आई.एम.एफ. च इत्येतं ब्रेटन-वुड्स-संस्थानम् अथवा ब्रेटन-वुड्स-ट्विन (ब्रेटन वुड्स इत्यस्य यमलसन्ततिः) इति रूपेण अपि कथयन्ति। एतस्मात् कारणात् एव अन्ताराष्ट्रिय-आर्थिक-व्यवस्था प्रायः ब्रेटन-वुड्स व्यवस्था इति अपि उच्यते।

विश्वकोषेन तथा च आई.एम.एफ इत्यनेन 1947 तमे ख्रिस्ताब्दे औपचारिकरूपेण कार्यस्य आरम्भः कृतः। एतेषां संस्थानानां निर्णयप्रक्रियायां पश्चिम-औद्योगिकानां देशानां नियन्त्रणं भवति। अमेरिका-विश्वकोषस्य आई.एम.एफ इत्यस्य च कम् अपि निर्णयं वीटो इति कर्तुं शक्नोति।

## नूतनशब्दः –

वीटो –(निषेधाधिकारः), एतस्य अधिकारस्य माध्यमेन एकस्य एव सदस्यस्य विमतिः कस्यापि प्रस्तावस्य निरस्तीकरणाय आधाररूपेण जायते।

अन्ताराष्ट्रिया मौद्रिकव्यवस्था राष्ट्रियमुद्राः मौद्रिकव्यवस्थाः च परस्परं योजयितुम् अस्ति। ब्रेटन-वुड्स-व्यवस्था निश्चित-विनिमय-परिमाणे आश्रिता भवति स्म। एतस्यां व्यवस्थायां राष्ट्रियमुद्राः यथा भारतीयमुद्रा रूप्यकं डॉलरमुद्रया सह केन निश्चित-विनिमय-परिमाणेन संयुक्ताः आसीत्। एतस्याः डॉलरमुद्रायाः विनिमयेन कति रूप्यकाणि दातव्यानि भविष्यन्ति, इदं निश्चितम् आसीत्। डॉलरमुद्रायाः मूल्यम् अपि सुवर्णेन बद्धम् आसीत्। एकस्याः डॉलरमुद्रायाः मूल्यं 35 औंसपरिमितस्य सुवर्णस्य समं निर्धारितम् आसीत्।

## 4.2 प्रारम्भिकं युद्धोत्तरवर्षम्

ब्रेटन-वुड्स-व्यवस्था-द्वारा पश्चिमस्य औद्योगिकराष्ट्राणां जापानस्य च कृते वाणिज्ये आये च वृद्धेः कस्यचित् अप्रतिमयुगस्य सूत्रपातः कृतः। 1950 तमवर्षाद् आरभ्य 1970 तमवर्षाणाम् आभ्यन्तरे विश्ववाणिज्यस्य विकासमूल्यं वार्षिकम् अष्टौ प्रतिशतात् अपि अधिकम् आसीत्। तस्मिन् काले वैश्विके आये प्रायः पञ्चप्रतिशतं मूल्येन वृद्धिः भवति स्म। विकासमूल्यम् अपि न्यूनाधिक्येन स्थिरम् एव आसीत्। तत्र अधिकः उपचयः अपचयः च नासीत्। एतस्मिन् काले प्रायः औद्योगिकदेशेषु अनाजीविकायाः प्रतिशतं पञ्चतः अपि न्यूनम् आसीत्। एतेषु दशकेषु प्रविधेः उद्यमस्य च विश्वव्यापी प्रसारः अभवत्। विकासशीलदेशाः विकसितैः औद्योगिकदेशैः सह समतां प्राप्तुम् अतीव पुरुषार्थं कुर्वन्ति स्म। अतः ते आधुनिकप्रविधिना यानि संयन्त्राणि उपकरणानि च कार्यं कुर्वन्ति स्म तादृशानां विदेशात् आनयने अपरिमितधनराशिं निवेशितवन्तः।

## चर्चां कुर्वन्तु –

सङ्क्षेपेण वदन्तु यत् द्वयोः महायुद्धयोः मध्ये याः आर्थिकपरिस्थितयः जाताः ताभ्यः अर्थशास्त्रिणः राजनेतारः च किं शिक्षितवन्तः ?

## 4.3 अनौपनिवेशीकरणं स्वतन्त्रता च

द्वितीयविश्वयुद्धे समाप्ते सति अपि विश्वसमुदायस्य कश्चन विशालभागः यूरोपीय-औपनिवेशिकस्य शासनस्य अधीने आसीत् । अग्रिमयोः द्वयोः दशकयोः एशियायाः अफ्रीकायाः च अधिकतराः उपनिवेशाः स्वतन्त्राः स्वाधीनाः च जाताः । परन्तु एते सर्वे देशाः निर्धनाः संसाधनानाम् अभावेन च ग्रस्ताः आसन् । एतादृशानां देशानाम् अर्थव्यवस्था समाजव्यवस्था च चिरकालं यावत् जायमानस्य औपनिवेशिक-शासनस्य कारणात् अव्यवस्थिता जाता आसीत् ।

आई.एम.एफ विश्वकोषस्य च रचनं तु औद्योगिकदेशानाम् आवश्यकताः पूरयितुं कृतम् आसीत् । एतानि संस्थानानि भूतपूर्वेषु उपनिवेशेषु निर्धनतायाः समस्यां विकासन्यूनतां च अपकर्तुं दक्षतासम्पन्नानि न आसन् । परन्तु येन प्रकारेण यूरोपः जापानः च स्वीयानाम् अर्थव्यवस्थानां च पुनःसङ्घटनं कृतवन्तौ एतस्मात् कारणात् एतादृशाः देशाः आई.एम.एफ. विश्वकोषः इति एतयोः द्वयोः संस्थयोः आश्रितौ न आस्ताम् । एतस्मात् कारणात् पञ्चाशत्तमदशकस्य अन्तिमेषु वर्षेषु ब्रेटनवुड्स-संस्थानं विकासशीलदेशेषु अपि पूर्वापेक्षया अधिकम् अवधानं कृतवान्।

विश्वस्य अल्पविकसिताः भागाः उपनिवेशानां रूपेण पश्चिमसाम्राज्यानाम् अधीनत्वे आसन् । विडम्बना इयम् आसीत् यत् सद्यः स्वाधीनानां राष्ट्राणां रूपेण अपि स्व-जनतां निर्धनतातः अविकासरूपगर्तात् च उद्धर्तुम् एतादृशैः अन्ताराष्ट्रियसंस्थानैः साहाय्यं स्वीकरणीयम् अभवत् येषु भूतपूर्वाणाम् औपनिवेशिकशक्तीनाम् एव आधिपत्यम् आसीत् ।

औपनिवेशिकी-करणस्य नैकवर्षेषु जातेषु सत्सु अपि बहुषु नव्य-स्वाधीनराष्ट्रेषु अर्थव्यवस्थासु च भूतपूर्वाणाम् औपनिवेशिकशक्तिनाम् एव नियन्त्रणम् आसीत् । ये देशाः ब्रिटेनस्य फ्रान्सस्य च उपनिवेशरूपेण पूर्वम् आसन् अथवा यत्र कदाचित् अपि तेषां राजनैतिकं प्रभुत्वम् आसीत् तत्रत्येषु महत्त्वपूर्णसंसाधनेषु यथा खनिजसम्पदासु भूमौ च अधुना अपि ब्रिटिशस्य फ्रान्सस्य च समवायानाम् एव नियन्त्रणम् आसीत् अपि च तादृशाः देशाः कथमपि तादृशं नियन्त्रणं परित्यक्तुं सज्जाः न आसन् ।

अनेकधा अमेरिकासदृशानाम् अन्येषां शक्तिशालिदेशानां बहुराष्ट्रियसमवायाः अपि विकासशीलदेशानां प्राकृतिक-संसाधनानाम् अत्यल्पमूल्येन दोहनं कर्तुम् आरभन्ते स्म ।

अपरतः अधिकतराः विकासशीलाः देशाः अपि पञ्चाशत्तमे षष्टितमे च दशके पश्चिम-अर्थव्यवस्थायाः तीव्रप्रगतेः किञ्चित् अपि लाभान्विताः न जाताः । एतां समस्यां पश्यन्तः तादृशाः देशाः समुपस्थापितवन्तः यत् तेषां कृते नवीना काचित् अन्ताराष्ट्रिया योजना () स्यात् इति , तथा च ते जी-77 इति समूहरूपेण सङ्घटिताः जाताः । एन.आई.ई.ओ इत्यनेन तेषाम् आशयः तादृश्याः व्यवस्थायाः आसीत् यत्र ते स्वीयेषु सर्वेषु संसाधनेषु वास्तविकतायां नियन्त्रणं प्राप्तुं शक्नुयुः यत्र च ते विकासाय अधिकं साहाय्यं प्राप्नुयुः, अशोधिततैलस्य समीचीनं मूल्यं प्राप्नुयुः, तथा च स्वीयानि सिद्धवस्तूनि विकसितदेशानां विपणिषु विक्रयणाय प्राप्तुं शक्नुयुः ।

### चतुर्थी मञ्जूषा

सहैव नैकेषु देशेषु व्यावसायकर्तारः समवायाः बहुराष्ट्रियनिगमाः (मल्टीनेशनल ) अथवा बहुराष्ट्रियसमवायाः इति कथ्यन्ते । प्रारम्भिकानां बहुराष्ट्रियसमवायानां स्थापना 1920 तमे दशके कृता आसीत् । पञ्चाशत्तमे षष्टितमे च दशके यदा अमेरिकीयाः व्यवसायाः आविश्वं प्रसरन्तः आसन् तथा च पश्चिमयूरोपः जापानः च अपि विश्वयुद्धस्य प्रभावात् शक्तिशालिनी औद्योगिकराष्ट्रे भवितुम् अग्रेसरौ आस्ताम् तदा एतादृशाः नैके समवायाः दृष्टिपथम् आयाताः इति । बहुराष्ट्रियानां समवायानां विश्वव्यापी प्रसारः पञ्चाशत्तमस्य षष्टितमस्य च दशकस्य विशेषतारूपेण आसीत् । तत्र आंशिकरूपेण कारणम् एतत् अपि आसीत् यत् अधिकतराः सर्वकाराः यानि वस्तूनि विदेशाद् अत्र आनयन्ति स्म तेषु अधिकम् आयातशुल्कं नियोजयन्ति स्म यस्मात् कारणात् महासमवायाः निजसंयन्त्राणाम् उपकरणानां च संस्थापनं तेषु देशेषु एव कर्तुं बाध्याः भवन्ति स्म, यत्र ते स्वीयानि उत्पादितवस्तूनि विक्रेतुम् इच्छन्ति स्म । तैः समवायैः गृह्योत्पादकानां रूपेण कार्यं करणीयं भवति स्म ।

### नूतनशब्दः –

आयातशुल्कम् – (Tariff) कस्माच्चित् इतरात् देशात् आगम्यमानेषु वस्तुषु गृह्यमाणम् आयातशुल्कम् । अयं करः अथवा इदं शुल्कं तस्मिन् स्थाने स्वीक्रियते यतः तत् वस्तु देशं प्रति आयाति, अर्थात् सीमायां, पोतस्थानके वायुस्थानके च इति ।

## 4.4 ब्रेटन-वुड्स इत्यस्य समापनस्य वैश्वीकरणस्य च आरम्भः

नैकानि वर्षाणि यावत् या तीव्रा वृद्धिः जाता ततः परम् अपि युद्धोत्तरविश्वे सर्वं समीचीनं न प्रवर्तते स्म। षष्टितमदशकात् एव विदेशेषु निजगतिविधीनां कृते यः व्ययः जातः तेन अमेरिकायाः वित्तव्यवस्था प्रतिस्पर्धिनी क्षमता च कृशत्वं प्रति गता। अमेरिकीय-डॉलरमुद्रा अधुना विश्वस्य प्रधानमुद्रायाः रूपेण पूर्ववत् सम्मानिता निर्विवादा च न आसीत्। सुवर्णस्य अपेक्षया डॉलरमुद्रायाः मूल्यस्य अपचयः जायमानः आसीत्। अन्ततः स्थिरस्य विनिमय-मूल्यस्य व्यवस्था विफला जाता तथा च प्रवाहमयी अथवा अस्थिर-विनिमय-मूल्यस्य व्यवस्था आरब्धा।

सप्ततितमदशकस्य मध्यकालात् अन्ताराष्ट्रिय-वित्त-संस्थानेषु अपि विपुलानि परिवर्तनानि जातानि आसन्। अधुना यावत् विकासशीलदेशाः ऋणार्थं विकास-सम्बद्ध-साहाय्यार्थं च अन्ताराष्ट्रियसंस्थानानाम् आश्रयत्वं प्राप्तुं शक्नुवन्ति स्म परन्तु अधुना ते पश्चिमेभ्यः व्यावसायिक-वित्तकोषेभ्यः निजेभ्यः ऋणदातृ-संस्थानेभ्यः च ऋणम् अग्रहीतुं बाध्याः कृताः। विकासशीलविश्वे काले काले ऋणसङ्कटः उत्पद्यमानः आसीत्। यस्मात् कारणात् आये न्यूनता जायते स्म अपि च निर्धनता वर्धते स्म। अफ्रीकायां लैटिनामेरिकायां च इयं समस्या आधिक्येन दृष्टा।

औद्योगिकविश्वम् अपि अनाजीविकायाः समस्यया ग्रस्तः जायते स्म। सप्ततितम-दशकस्य मध्यकालात् अनाजीविकायाः अवस्था जायामाना आसीत्। नवतितमदशकस्य प्रारम्भिकवर्षाणि यावत् तत्र विपुलतया अनाजीविकायाः समस्या आसीत्। सप्ततितमदशकस्य अन्तिमवर्षेभ्यः बहुराष्ट्रियसमवायाः अपि एशियायाः एतादृशेषु देशेषु उत्पादनं केन्द्रितं कर्तुम् आरब्धवन्तः यत्र वेतनम् अतिन्यूनम् आसीत्।

1949 तमे ख्रिस्ताब्दे या क्रान्तिः जाता ततः परं चीनदेशः विश्वार्थव्यवस्थातः पृथक् एव आसीत्। परन्तु चीने नव्यानाम् आर्थिकनीतीनां सोवियतसङ्घस्य च विखण्डनं तथा च पूर्वयूरोपे सोवियतशैल्याः अर्थव्यवस्था समाप्ता जाता ततः परं नैके देशाः पुनः विश्वस्य अर्थव्यवस्थायाः अङ्गरूपेण जाताः।

चीनसदृशेषु देशेषु वेतनं तुलनात्मकरूपेण न्यूनम् आसीत्। फलतः, विश्वविपण्यां स्वीयं प्रभुत्वं स्थापयितुं प्रतिस्पर्धन्तः वैदेशिकाः बहुराष्ट्रियाः समवायाः तत्र प्रभूतं निवेशम् आरब्धवन्तः। किं भवन्तः अस्मिन् तथ्ये अवधानं कृतवन्तः यत् अस्माकम् अधिकतराणि दूरदर्शनानि चलभाषयन्त्राणि क्रीडनकानि च चीनदेशे निर्मितानि भवन्ति अथवा तद्वत् एव प्रतिभान्ति ? इयं चीनस्य अर्थव्यवस्थायाः अल्पव्यययुक्ता अर्थव्यवस्था विशेषतया तत्रत्यस्य न्यूनवेतनस्य एव परिणामरूपेण अस्ति।

शिल्पशालाः न्यूनवेतन-युक्तान् देशान् प्रति नीताः तस्मात् कारणात् वैश्विकवाणिज्यं सम्पत्ति-प्रवाहः च अपि दुष्प्रभावितः। गतयोः द्वयोः दशकयोः भारतस्य चीनस्य ब्राजीलादीनां च देशानाम् अर्थव्यवस्थासु जातानां परिवर्तनानां कारणात् विश्वस्य आर्थिकसंरचना सर्वथा परिवर्तिता अस्ति।

### नूतनशब्दः –

विनिमयमूल्यम् – एतस्याः व्यवस्थायाः माध्यमेन अन्ताराष्ट्रियवाणिज्यस्य सौविध्यार्थं विभिन्नदेशानां मुद्राः परस्परं संयोज्यन्ते। स्थूलरूपेण विनिमयमूल्यं द्विविधं भवति – स्थिरं विनिमयमूल्यं परिवर्तनशीलं विनिमयमूल्यं च।

स्थिर-विनिमय-मूल्यम् – यदा विनिमयमूल्यं स्थिरं भवति तथा च तत्र जायमानस्य आरोहावरोहस्य नियन्त्रणाय सर्वकारैः हस्तक्षेपः करणीयः भवति तदा एतत् विनिमयमूल्यं स्थिर-विनिमयमूल्यम् इति कथ्यते।

स्थितिस्थापकत्वम् अथवा परिवर्तनशीलं विनिमयमूल्यम् – एतादृशं विनिमयमूल्यं वैदेशिक-मुद्राविपण्यां विभिन्नमुद्राणां आवश्यकतायाः आपूर्तेः च आधारेण तथा च सिद्धान्तेन सर्वकाराणां हस्तक्षेपं विना उपचयम् अपचयं च प्राप्नोति।

## सङ्क्षेपेण लिखन्तु –

1. सप्तदशशताब्दात् पूर्वं जायमानस्य आदानप्रदानस्य उदाहरणद्वयं यच्छन्तु। एकम् उदाहरणम् एशियायाः द्वितीयं च अमेरिकामहाद्वीपस्य विषये चिन्वन्तु।
2. सूचयन्तु यत् पूर्वाधुनिके विश्वे रोगाणां वैश्विकप्रसारेण अमेरिकीयभूभागानां च उपनिवेशीकरणे कथं साहाय्यं कृतम्।
3. निम्नलिखितानां प्रभावाणां व्याख्यां कुर्वन्तः संक्षिप्तटिप्पणीः कुर्वन्तु –
   (क) कॉर्न-लॉ इत्यस्य समाप्तेः विषये ब्रिटिशसर्वकारस्य निर्णयः।
   (ख) अफ्रीकायां रिण्डरपेस्ट इत्यस्य आगमनम्।
   (ग) विश्वयुद्धस्य कारणात् यूरोपे कार्यसाधकानां पुरुषाणां मृत्युः।
   (घ) भारतीयायाम् अर्थव्यवस्थायाम्आर्थिकमहामन्दतायाः प्रभावः।
   (ङ) बहुराष्ट्रियसमवायद्वारा स्वीयस्य उत्पादनस्य एशियादेशेषु स्थानान्तरणस्य निर्णयः।
4. खाद्योपलब्धतायाः विषये प्रविधेः प्रभावं दर्शयितुम् इतिहासात् उद्धृत्य उदाहरणद्वयं यच्छन्तु।
5. ब्रेटन-वुड्स इति सन्धेः कः अर्थः अस्ति।

## चर्चां कुर्वन्तु

6. कल्पनां कुर्वन्तु यत् भवन्तः कैरीबियायी-क्षेत्रस्य कार्यकर्ता अनुबन्धश्रमिकाः सन्ति। एतस्मिन् अध्याये प्रदत्तानां विवरणानाम् आधारेण स्वीयायाः स्थितेः स्वभावनायाः च वर्णनं कुर्वन्तः स्वकुटुम्बाय पत्रं लिखन्तु।
7. अन्ताराष्ट्रियेषु आर्थिक-विनिमयेषु त्रिविधानां गतीनां प्रवाहाणां वा व्याख्यानं कुर्वन्तु। त्रिविधगतीनां भारतेन भारतीयैः च सम्बद्धम् एकैकम् उदाहरणं यच्छन्तु तथा च तेषां विषये संक्षेपेण लिखन्तु।
8. आर्थिकमहामन्दतायाः कारणानां व्याख्यानं कुर्वन्तु।
9. जी-77 देशैः भवन्तः किम् अवगच्छन्ति। जी-7 7इति केन आधारेण ब्रेटन-वुड्स इत्यस्य युग्मसन्ततेः प्रतिक्रियारूपेण कथ्यते। व्याख्यां कुर्वन्तु।

## परियोजना-कार्यम्

नवदशशताब्दे दक्षिणाफ्रीकायां सुवर्णहीरकानां खननस्य विषये इतोऽपि सूचनाः एकत्रीकुर्वन्तु। सुवर्ण-हीरक-समवायेषु कस्य नियन्त्रणम् आसीत्? खनिकाः के जनाः आसन् अपि च तेषां जीवनं कीदृशम् आसीत्?